सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[त्रैमासिकी]

१९ वर्षे, १ अङ्कः

संवत् २०२१

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

[त्रैमासिकी]

सम्पादकः

श्रीक्षेत्रेशचन्द्रचट्टोपाध्यायः ।

१९ वर्षे, १ अङ्कः

संवत् २०२१

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विषयानुक्रमणिका

विज्ञानशास्त्रम् अध्यात्मनिष्ठा च—डॉ० रेनर् सी० जानसन्, आस्ट्रेलियास्थः । १–१२

भट्टप्रभाकरयोः प्रस्थानभेदः—श्रीरामचन्द्रशास्त्री खनङ्गः, वा० सं०वि०वि० वाराणसी । १३–२०

ब्रह्मस्वरूपविमर्शः—श्रीदेवदत्तशर्मोपाध्यायः, प्राचीनव्याकरण-दर्शनविभागाध्यक्षः,
वा० सं० वि० वि० वाराणसी । २१—३६

अभिज्ञानशाकुन्तलसमीक्षा—श्रीमहादेव उपाध्यायः वा० सं० वि० वि०
साहित्याध्यापकः । ३७–६२

सन्ध्याविमर्शः—श्री के० पी० नारायणशास्त्री, सरस्वतीभवनम्, वाराणसी । ६३–७८

ज्योतिषशब्दस्य साधुत्वम्—डॉ० रामशङ्करभट्टाचार्यः, व्याकरणाचार्यः, एम० ए०,
पीएच० डी०, वा० सं० वि० वि० अनुसन्धानसहायकः । ७९–८२

ग्रन्थः

सिंहलताजिकोक्ताः षोडशयोगाः, नृसिंहदैवज्ञविरचितः प्रश्नसारश्च । सम्पादकः—
श्रीमीठालाल ओझा, वा० सं० वि० वि० ज्यौतिषप्राध्यापकः । क–ख, १–१४

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

१९ वर्षः } ज्येष्ठपूर्णिमा, संवत् २०२१ { १ अङ्कः

विज्ञानशास्त्रम् अध्यात्मनिष्ठा च

डॉ० रेनर् सी० जानसन्, आस्ट्रेलियास्थः ।

यद्यपि योगार्थदृष्ट्या साइन्स् (= विज्ञानम्) इति शब्दस्यार्थो ज्ञानमेव, तथापि प्रतीच्यदेशे यस्मिन्नर्थेऽयं साइन्स्-शब्दो बहुलं व्यवह्रियते सर्वैश्चावबुध्यते, सोऽर्थो रूढः (संकीर्णः) एव । इन्द्रियगम्यं विषयमाश्रित्य यद् न्यायसंगतं ज्ञानं प्रवर्तते, तदेव विज्ञान(Science)-पदवाच्यं भवति । खीष्टीयसप्तदशशताब्द्याम् आधुनिकं विज्ञानशास्त्रमवतीर्णमिति सामान्यतोऽभ्युपगम्यते । तदा विज्ञानस्य प्रकर्षः क्षीण आसीत् । कोपर्निकस्नामधेयो विद्वान् १५४३ तमे खीष्टाब्दे स्वकीयं ग्रन्थं प्रकाशितवान् । यत्रोक्तम्—"पृथिवी ग्रहाश्च सूर्यं केन्द्ररूपेण समाश्रित्य भ्रमन्ति" इति । पञ्चाशदधिकशततमवर्षानन्तरं मतमिदं लोके सुप्रतिष्ठितं जातम् । यतो ह्यस्मिन् मते धर्मशास्त्रस्य प्रामाण्यमनभ्युपगतम्, अतो बहवो जना विज्ञानशास्त्रविदां विरोधिनोऽभवन् । संघटितखीष्टधर्मस्याभिव्यक्तिसाधनभूतं मध्यकालिकं यत् चर्च(Church)नामधेयं धर्मसंस्थानं रोमदेशानुमोदितमासीत्, तस्याऽत्यन्तप्रभावो यूरोपखण्डनिवासिषु जातः । मृत्युदण्डेनावरोधबलेन निर्वासनदण्डबलेन च चर्चनामकं संस्थानमिदं जनान् सर्वतोभावेन वशीचकार । "सत्यमस्माभिर्ज्ञातम्, तच्चास्माभिः साक्षात्कृतम्" इति वस्तुतश्चर्चनामकसंस्थानस्योद्घोष आसीत् । चर्चसंस्थासंमतमतप्रत्यवस्थानं खलु विगर्हितं विपज्जनकं कर्म जातम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भवतां भारते वर्षे शास्त्रवाक्यापेक्षः कोलाहलोत्पादको मताग्रहो नास्तीति मयाऽनुमीयते। बहवो दृष्टयोऽनेकाश्च भावनाः (Faith) भवद्भिरभ्युपगताः, परन्तु स्मरणार्हमिदं यत् प्रतीच्यदेशीयं विज्ञानशास्त्रं द्विशतवर्षं यावद् मताग्रहाणां प्रशमनार्थं प्रायतत; स च मताग्रहविज्ञानयोर्विरोध इदानीं समाप्तिं गतः। शास्त्रवाक्यप्रामाण्याश्रितमताग्रहसंबन्धिन्यस्मिन्निवृत्ते पाश्चात्यवैज्ञानिकानां धर्मविषयकोऽविश्वासः प्ररूढो वर्तते। कोपर्निकस्मतस्वीकरणे यः कालविलम्बो जातस्तस्य तु नेदं कारणं यत् तत्कृतगणनायाथार्थ्यविषये तत्परीक्षणलब्धमतविषये वा संशयो जातः, प्रत्युतेश्वरजीवसंबन्धविशेषख्यापके मतविशेषे संशयः कोपर्निकस्मतेन समुद्भावितः। धर्मसंस्थानैः स्वीकृतमासीत्—"आकाशे पृथिव्येव केन्द्रभूता" इति। तदेतन्मतं प्रत्याख्यातं कोपर्निकस्महोदयेन।

यदा मानवबुद्धिः केषुचित् प्ररूढेषु मतेष्वाग्रहवती जायते (यन्मतसत्ताविषये परीक्षणाय न प्रयत्यते जनैः), तदा शास्त्रवचःप्रामाण्यमाश्रित्य जनाः स्वमतसमर्थनाय दुराग्रहेण प्रचेष्टन्ते। यदि किमपि प्रमाणं विपरीतार्थसाधकं स्यात् तर्हि तद् अन्ततो गत्वाऽवश्यमेव स्थास्यति, एतदनन्तरं नूतना फलवती च दृष्टिरुदेष्यति। खीष्टीयसप्तदशशताब्द्यां 'वैज्ञानिक्युत्क्रान्तिः' (Scientific Revolution) इत्येतादृशी स्थितिर्यूरोपखण्डे जाता। बटरफील्डनामा केम्ब्रिजविश्वविद्यालयाध्यापको मनोवृत्तेरिदं परिवर्तनमभिलक्ष्य मनोज्ञया शैल्याह—"खीष्टधर्मप्रवर्तनानन्तरं येयं मनोवृत्तिर्जाता सा सर्वाणि मतान्यतिशेते" इति। अभिनवदृष्टेर्लक्षणमिदम्—कश्चित् खलु परीक्षणमकृत्वा वाङ्मात्रेणैव नेदमभिधातुं समर्थः—'कथं प्रकृतिः कार्याणि संपादयति' इति। यत्नपूर्वं परीक्षणं प्रयोगश्चेत्येतद्द्वयमेवाविष्कृतेरनन्य उपायः। ततश्च प्रमेयकल्पना (Hypothesis), सोपपत्तिकसिद्धान्त(Theory)श्च सुष्ठु निश्चीयेते, तदनन्तरं च निगमनान्यपि कर्तुं शक्यन्ते। ततश्चानुमितार्थसिद्धये परीक्षणप्रयोगावभ्युपगन्तव्यौ, यतः सर्वपरिदृष्टघटनाव्याख्यानकारकं तत्त्वं सम्यङ् निश्चितं स्यात्। इयं तत्त्वसमन्वयपद्धतिः 'विज्ञानसंमता पद्धतिः' (Scientific Method) इत्युच्यते।

यूरोपदेशे ऊनविंशशताब्द्यां प्राक्तनमतविरोधप्रतिध्वनयः पुनः श्रुताः, यदा मानववंशस्य विकाशं क्रमगतिं (Descent) चाश्रित्य चार्लस्डार्विन्महोदयेन स्वमतं प्रवर्तितम्। विचारणीयमिदं यदयं विरोधो न जडविज्ञानेन सहाऽध्यात्मनिष्ठायाः, प्रत्युत विज्ञानपद्धत्यनुमोदितेन विकाशवादेन सह प्राचीनशास्त्रवाक्यस्यैव विरोध एषः। अत्रेदं विज्ञेयं यद् यद्यपि शास्त्रे काव्यपद्धत्या किमपि रहस्यगर्भमेव वाक्यमुक्तम्, तथापि तच्छास्त्रवाक्यमभिधयैवावबुद्धं सांप्रदायिकैः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विज्ञानशास्त्रम् अध्यात्मनिष्ठा च

कीदृशमस्या अध्यात्मनिष्ठायाः स्वरूपमितीह विचार्यते। ऐन्द्रियिकस्य जगतो यद् नियन्तृ सर्वानुस्यूतं तत्त्वम्, ऐशं दिव्यं च यन्नियमनं विद्यते, मानवकृतं तदङ्गीकरणं तत्संवेदनं वाऽध्यात्मनिष्ठेत्युच्यते। इदमप्यङ्गीक्रियतेऽध्यात्मदर्शनेन यद् एतेन पारमार्थिकेन तत्त्वेन सह मानवः संबद्ध इति। अध्यात्मदृष्टिसंपन्नो जन एतत्संबन्धानुसारेणैव जीवनं धारयति। सत्यतासौन्दर्यसाधुताप्रेमज्ञानरूपाः परमार्थसंबद्धाः पदार्था एवाऽध्यात्मनिष्ठेन पुरुषेण सत्यतयाऽभ्युगम्यन्ते। किञ्च, स व्यावहारिके जीवनेऽप्येतान् गुणान् बिभर्त्येव।

सन्ति प्रतीच्यदेशे बहवो जडवादिनः (Materialistic), ये सत्यत्वसौन्दर्यसाधुत्वादिविषयानपि कथञ्चिद् वाङ्मात्रेण स्वीकुर्वन्ति। केचन खलु पारमार्थिकं नियमनं स्वप्रतिभयाऽभ्युपगच्छन्ति, अकपटरूपेण च परमार्थालोकानुसारेण स्वजीवनं धारयन्ति। स्वल्पा एव रहस्यवादिनः (Mystics), ये खलु 'अहं साक्षात्करोमि' इति वदन्ति, न तु 'अहं विश्वसिमि' इति। भवतां भारते देशे बहवश्च रहस्यवादिनः, येषु परमार्थदर्शनस्य श्रेयस्करतां प्रति स्वाभाविकी बुद्धिर्दृश्यते। नैषा दृष्टी राष्ट्रान्तरवासिष्ववलोक्यते। भारते पुनर्जडवादिनः प्रायशोऽल्पसंख्यका एव।

भारतीयपरम्परायाः प्रतीच्यपरम्परायाश्च तत्त्वावधारणदृष्टेर्वैलक्षण्यम् (Difference of emphasis) अस्ति। यद्यप्येतादृशं सामान्यनिर्धारणं (Generalisation) विवादास्पदं भवति, तथापि विरोधमभ्युपगम्यापि मयोच्यते—भारतीया जना मूलतः कर्मकाण्डबहुलसदाचारसंपन्ना अप्याध्यात्मिकतत्त्वदृष्टिसंपन्नाः। प्रतीच्यजनदृष्ट्या धर्ममूलक आचारो नातिप्रशंसितो भवति, धर्मसंबद्धनिर्देशा धर्म्या आचाराश्च न प्रशस्यन्ते, यतो ह्यत्र वैज्ञानिकी दृष्टिरेव विवर्धमाना। अल्पा एव जना ये वस्तुतो धर्माचरणपरायणाः। प्रतीच्यो देशोऽध्यात्मदृष्टिसंपन्नैर्जनैः सर्वतोभावेनाध्युषित इति मया न कथयितुं शक्यते, परन्त्वेतत्तत्त्वनिश्चायको हेतुर्यथा भारते दृश्यते, न तथा पाश्चात्ये देशे। अध्यात्मतत्त्वसाधनाय विप्रयात् प्रतिसंहार (निवृत्तिः) एवाध्यात्मदृष्टेर्लक्षणमिति पुरा भारतवर्षे उक्तमासीत्। इदानीं पुनः समाजोन्नतये सत्कर्मानुष्ठानमेवाऽध्यात्मदृष्टिरिति मतमत्यन्तं समादृतं दृश्यते सर्वत्र। सेयं दृष्टी रामकृष्णमिशनकृतकर्मसु विनोवादिप्रवर्तितेषु जनतासेवामूलककर्मसु च चरितार्था भवति। प्रतीच्यदेशेऽध्यात्मनिष्ठा कर्मयोगरूपेण विपरिणता प्रायशः। एनां दृष्टिमाश्रित्य महान्ति कर्माण्यनुष्ठितानि बहुभिः सज्जनैः। एतादृशेषु जनेषु अफरीकानिवासी डॉ० स्वाइत्सरः (Schweitzer), लब्रेडरवासी डॉ० ग्रेनफेलः

CC-0. Sampurnanand University Collection. Digitized by eGangotri

(Grenfell), कुष्ठिसेवा-जीवनव्रतः खीष्टधर्मयाजी दमेननामा (Father Damen) च प्राधान्यं भजन्ते ।

प्राच्यदेशीयानां प्रतीच्यदेशीयानां वाऽध्यात्मनिष्ठानां विदुषां परस्परं मतेष्वात्मज्ञान-लोकाभ्युदयस्म्बद्धेषु कृत्स्नश ऐकमत्यं वर्तत इत्यत्र नास्ति कश्चन संशयः। अत एव सुष्ठूक्तं भगवता कृष्णेन—'यः कोऽपि मार्गं आश्रीयतां नाम, सर्वैरेव मार्गैः स परमात्मैवाधिगम्यते' इति ।

यन्त्रविद्यायाः (Technology) प्रतीच्यविज्ञानशास्त्रस्य च यदन्तरं तदेवास्माभिः सूक्ष्मरूपेण चिन्तनीयम् । यद्वा—मनोगुणस्तद्धारकं प्रत्यवेक्षणं चैकतः, अपरतश्चाऽध्यात्मनिष्ठा चिन्तनीयेति वरम् ।

प्रतीच्यविज्ञानशास्त्रस्य पदक्रमो भीरो निश्चितश्चाभवत् । नैतिक्याध्यात्मिकी च शक्ती भारसाम्यरक्षार्थं सुष्ठु व्यवस्थापनीये । भवतु नाम, इदं स्वीकार्यमेव यदर्थमाश्रित्य बहवो वैज्ञानिका अनुसन्धानं कृतवन्तः, ते चार्था उपादेयाः संपन्नाः । 'सत्यं तत्त्वं विज्ञेयम्' इत्येव प्रतिज्ञाय सत्यानि तत्त्वानि गवेषितानि विज्ञानशास्त्रवेत्तृभिः । इन्द्रियगोचरं जगद् ज्ञातुं प्रयतमाना ये वैज्ञानिकास्ते कवि-टनेसनविरचितैतत्पद्यार्थं प्रकटीकुर्वन्ति—

प्रवहतु नित्यं ज्ञानं बहुबहुतरार्थावभासकं वै यत् ।
हृदि निवसतु चास्माकं श्रद्धाप्राचुर्यमेवात्र ॥[१]

अद्य खलु कालकृता भूयासः परिणामा जाता विज्ञानशाखासु । यथा भूतविज्ञाने (Physics), विद्युच्छक्तिविद्यायां (Electronics) च शासकवर्गैः प्रचुरस्य धनस्य व्ययः कृतः, सेनाबलाभिवृद्धये प्राकृतिकी शक्तिर्यथोपयुक्ता स्यादिति । सेयं मनोवृत्तिरद्यापि न परिक्षीणा जाता । बहवश्च विज्ञानविदः शासकीयभृतिभाजः (in the service of Government), न च सत्यार्थनिर्णयपरायणाः । अस्माकं काले इयं दुःखफला तिरस्कार्या स्थितिः, तद् मानवजातिसंहारकारिणी शक्तिरल्पसंख्यकेषु जनेषु विद्यते । वयं सभयाः शङ्कमानाः सन्तः पृच्छामः—"क्व च साऽध्यात्मनिष्ठा प्रज्ञा वा ययेदं सुनिर्णीतं भवेद् यदियं सर्वसंहारकारिणी शक्तिः श्रेयसे एव विनियोजनीया, नाश्रेयसे" इति । एतद्युगे इयमेव महती समस्या । एनां समस्यामाश्रित्य मया विचारः कृतः । भवतां समक्षं मया मननजाता निर्देशाः (suggestions) उपस्थाप्यन्ते, येन समाधानं सुकरं स्यादिति ।

---

1. Let knowledge flow from more to more
And more of reverence on us dwell.

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विज्ञानशास्त्रम् अध्यात्मनिष्ठा च

अस्मिन् गरीयसि विषये यथार्थविचारणाया आवश्यकताऽस्तीति मयाऽध्यवसीयते। यदि भवान् अध्यात्मदृष्टिसंपन्नः, वैज्ञानिकपद्धतिं प्रति यदि भवत आस्था विद्यते, तर्हि सर्वेषां सत्याना-मेकत्वं भवता नूनमभ्युपगतं भवेत्। यत् (ज्ञानम्) स्वं सत्यरूपेणोपस्थापयति, सत्यान्तरेण सह संपर्कं प्रभावं च विजहाति, तदेव संशय इत्युच्यते। सत्यं खलु बहुपार्श्व-(Facet)युतं रत्नमिव विद्यते, यस्यैकोंऽशो विज्ञानशास्त्रम्, अपरो गणितशास्त्रम्, इतरः कलासंबद्धं सत्यम्, अन्यः काव्यसंबन्धिसत्यम्, रहस्यवादिनामन्तर्दृष्टिरप्यपरोंऽशः। परमसत्यस्यांशभूता एवैते पदार्थाः, यत् परमसत्यमाश्रित्य बहूनि यथायोग्यानि नामानि प्रयुक्तानि जनैः। कदाचिद् मयाऽपि काचिदभिनवा चिन्ता कर्तुं शक्यते, अत इदमुच्यते यदस्माकं जागती परिस्थितिः पर्वताभ्यन्तरे विवरमार्ग-(Tunnel)स्थापनमिव विद्यते। अस्यैकपार्श्वतो रहस्यवादिनः सूक्ष्माध्यात्मदृष्टिसंपन्नाश्च राजन्ते, ये विवरमार्गं केन्द्रगं कर्तुमिच्छन्ति। विज्ञानवेत्तारश्चापरपार्श्वतः, येऽपि पर्वते विवरं कुर्वन्ति। किमुभावेतौ रहस्यवादिविज्ञानवेत्तारौ मिलितौ भविष्यत इत्येवा-स्माकमुत्कटः प्रश्नः। अथवेदमपि प्रष्टव्यम्—किं विज्ञानशास्त्रं स्वपथात् च्युतं भवति ?

रहस्यवादिदृष्टं सत्यं तथैव पुनः परीक्षणार्हं यथा विज्ञानवेत्तृसंमतं मतम्, यद्यपि पुनः परिक्षणपद्धतिर्विलक्षणैव। आध्यात्मिकसत्यमतपरीक्षणं तुलादण्डेन परिमापनप्रणाल्या च न संभाव्यते। रहस्यवादी स्वानुभवबलेनेदं तत्त्वं परीक्षितुं समर्थ इति निश्चयम्। रहस्यवादिनं प्रत्यविसंवादिबोधरूपेण सत्यतत्त्वं प्रतिभाति, अतो बुद्धिजातस्य संशयलेशस्याप्यवकाशो न विद्यते। विश्वासः संशयश्च बुद्धिक्षेत्रे एव विद्येते। रहस्यात्मकं ज्ञानं खलु सूक्ष्मतरभूमिकास्पर्शि, यत्रानु-भवकारी स्वयमेव परीक्षणकृत् परीक्षणागारश्च। रहस्यवादी खलु चरमवस्तुविश्लेषणकारी विज्ञानवेत्तैव, यद्यपि स एतादृशसत्यार्थस्य प्राप्तये स्वयमेवात्मानं योग्यं विदधाति। यावत्काल-पर्यन्तं स आत्मानं नैतादृशं करोति, तावच्चरमार्थग्रहणं तथैवासंभवि, यथा धूलियुतदर्पणेन मलिनेन दूरवीक्षणयन्त्रेण (Telescope) आलोकस्य ग्रहणम्।

प्रतीच्यविज्ञानशास्त्रसमालोचनार्थमध्यात्मविद्भिर्द्वे मते (Grounds) आश्रिते इति मन्यते मया। अनुभवगम्येषु सर्वेषु तत्त्वेषु प्रतीच्यविज्ञानविद् जडवाददृष्टिमेवाभ्युपगच्छ-तीत्येकं मतम्। द्वितीयं तु—अल्पं क्षेत्रं सुविचार्य जडविज्ञानवित् पूर्णक्षेत्रसंबद्धान् नियमान् विशेषतः प्रतिपादयितुमीष्ट इति। सेयं मनोवृत्तिदर्शनतत्त्वविदां विचारसरणिम् (Mantle of philosopher) अनुकरोति। न खलु सर्वे विज्ञानविदो जडवादिनः। किञ्च, मम मते जडवादिनां वैज्ञानिकानां संख्याऽपि ह्रासमापन्नाऽवलोक्यते। एवं सत्यपि प्रतीच्यदेशीयानां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

जनानां जीवने मनने च जडवादस्य प्रभावो विद्यते। एतैर्मन्यते यदिदं व्यावहारिकं प्रत्यक्षसिद्ध-मनुभवगोचरं जगद् वस्तुसदेव। अपि चैतैरिदमप्युच्यते यच्चित्तं वा भवतु, अनुभवो वा, वस्तुसारसंबन्धिगुणागुणविचारो वा (Appreciation of values) एतत् सर्वं स्वसत्ता-सिद्धये बाह्यं जगदेव समाश्रयते। सत्याश्रितं यन्मतं मया चिन्त्यते, पूर्ववर्णितं मतं तस्याऽत्यन्त-विरोध्येव। प्रतीच्यदेशीयान् श्रोतॄन् मनोविद्याविषयकेऽनुसन्धानाविष्कारविषये यदाहं किमपि कथयामि तस्यायमेव हेतुर्यत् ते खल्वाविष्कारा मनोविषयकाः प्रत्यक्षयोग्याः स्वीकार्याश्च, परीक्षणागारे नरैस्ते प्रदर्शिता अपि भवितुमर्हन्ति, येषां नराणां मानसी शक्तिरन्यापेक्षया पूर्णतरा। निश्चप्रचमिदं यदेतादृश्या मानसशक्तेः स्वीकारो जडवाददृष्टिं तिरस्करोति। जडवादे 'मस्तिष्कक्रियाश्रयि मनः' इत्यभ्युपगम्यते। विज्ञानवेत्तृमतसमीक्षाया द्वितीयो मार्गस्त्वयं यद् विज्ञानवित् पूर्णविषयसंबद्धानि मतान्यभिदधाति। स जैवदर्शनमाश्रित्यापि मतं प्रतिपाद-यति, यद्यपि जीवतत्त्वसंबन्धिमतस्थापने तस्य मनीषा नास्ति। इदानीं विज्ञानवेत्तारः स्वल्पतर-क्षेत्रमाश्रित्य विवेचनं कुर्वन्ति। यद्यपि तद्विवेचनार्हो विषयः स्वल्पः स्वल्पतरो वा भवेत्, तथापि तमाश्रित्य सूक्ष्मं सूक्ष्मतरं चानुसन्धानं विदधाति विज्ञानशास्त्री। स्वल्पविषयगवेषणार्थं स जीवन-संबद्धं महत् तत्त्वं विजहाति। यदि स शरीरसंस्थानवित् (Anatomist), शरीरव्यापारविद् (Physiologist) वा तर्हि स माङ्गल्यदयानुरागशौचादीनां गुणत्वं परस्परपार्थक्यं च विचार-णीयविषयत्वेन न स्वीकरोति। इमे बुद्ध्यादयः पदार्थाः खलु मानवान् मानवेभ्यो विशेषयन्ति। यदि स वैज्ञानिको भूतविज्ञानवेत्ता (Physicist) तर्हि आणवरचनाभूमिम् (Level of atomic structure) एव विचारयति, जगत्संबन्धिसूक्ष्मरचनाविचारं विजहाति। मौलिकावयवं विशेषेण ज्ञातुं भूतविज्ञानविद् आणवजगतः सूक्ष्मरूपमाश्रित्य विवेचयति।

बहुसंबन्धयुक्तेऽस्मिन् जगति स्थितिरस्माकम्, तदिदं जगद् गुणप्रचुरम्, सम्बन्धबहुलत्वात्। यदा च विज्ञानविद् विश्लेषणजनितकार्यकारणनिर्धारणपद्धतीः (Methods of analytical breakdown) समाश्रित्य यथाक्रमं वस्तुपरीक्षणं करोति, तदा स संबन्धोत्थान् इमान् गुणान् परित्यज्यैव परीक्षते। इदमेव कारणं यद् विज्ञान-शास्त्रदृष्टिसंपन्नो वैज्ञानिक आन्वीक्षिक्यनुसारेण कृत्स्नं तत्त्वं व्याकर्तुं (Philosophise about the whole) प्रायेण न समर्थो भवति। अत एव च स प्राणक्रियाश्रितान् सत्ताश्रितान् च सूक्ष्मान् प्रश्नानपि व्याख्यातुमसमर्थो भवति। येन खलु स्वपूर्णतायाः पराकाष्ठाऽनुभूता, स एव यद्येषां प्रश्नानामुत्तरं दद्यात् तर्हि तदुत्तरं समीचीनं स्यादिति। येन खलु मुनीनां साधूनां

CC-0. Sampurnanand University Collection. Digitized by eGangotri

च चरितमाचरितम्, स एवैतादृशः कश्चिदिति मे प्रतिभाति। जीवनतत्त्वस्वरूपं स एवास्मान् व्याकरिष्यतितराम्, यतो हि स जीवनं कृत्स्नशः प्रशान्तधिया च पश्यति। सन्ति च वस्तूनि यानि स्वावयवैः सहैव निरूप्यन्ते सारासारतः। यदि पुनस्तानि विश्लिष्टानि, अवयवशो विभक्तानि वा भवेयुस्तर्हि तेषां वस्तूनां मूलगतं वैशिष्ट्यं नश्येत्। या खलु कलाजन्या कृतिः, सैतादृश्येव। (अत्र विशेषजिज्ञासुभिः जे० सी० स्मटकृतः (Philosophy of Holism) नामधेयो ग्रन्थः पठनीयः)।

विज्ञानशास्त्रस्याऽध्यात्मनिष्ठायाश्च याथार्थ्यनिरूपणप्रसङ्गेऽध्यात्मनिष्ठैवादावालोचनीया। यो रहस्यवादी (Mystic) सोऽध्यात्मनिष्ठायाः परां काष्ठामनुभवति। एवं सत्यपि यतो रहस्यानुभवं वशीकर्तुं स्वाभिप्रायानुसारेण च तं चालयितुं न कश्चित् समर्थो भवति, अतः किमस्माभिरिदमेवास्थेयं यदध्यात्मदर्शनं कादाचित्कमेव, न वा सर्वैरुपलब्धुं शक्यते। यदि नामेदमेव सत्यं स्यात् तर्हि जगदान्ध्यं (Black world) स्यात्। यैः कदाचिदपि रहस्यतत्त्वं नावबुद्धम्, तेषामपि सत्यदर्शनविषयाऽतिस्फुटा प्रतिभा (Intuition) विद्यते। इयमनौपदेशिकी प्रतिभा जीवानां पूर्वजन्मगतं संस्कारं बोधयति। जन्मान्तरीयः संस्कारो हेतुर्भवतु, अन्यद् वा हेतुर्भवतु, अस्माभिरिदमभ्युपगन्तव्यं यदस्माभिरेव कदाचिद् उच्यते—"घण्टाध्वनिः प्रवर्तते" इति। अस्य तात्पर्यं त्वन्तर्निनादः श्रूयते, अथवाऽश्रुतपूर्वं तत् तत्त्वमहं सदैव साक्षाद् ज्ञातवानिति। यदि परमया प्रतिभया जीवनं चालयितुं वयमभिलषामस्तर्ह्यध्यात्मदर्शनस्य प्रतिरूपा भविष्याम इति। यदेव परमतत्त्वरूपेणास्माभिरन्तःप्रज्ञयाऽवधार्यते, तत्प्रति श्रद्धा करणीयेत्येवाऽध्यात्मनिष्ठायाः सारभूतं तत्त्वम्। वैज्ञानिकपद्धत्या नेदं निश्चितं भवितुमर्हति यद् वयमुन्मार्गावलम्बिनो जाता न वेति, परन्त्वन्ययैव कयाचित् पद्धत्या स्वतः स्वानुभवरूपेणैव जीव एतत् स्वयमेव निश्चिनोति। ततश्च जीवनानुभवबलेनैवेदं तत्त्वं प्रमितं भवति। सन्ति चान्ये पदार्था यत्र नियमोऽयं चरितार्थो भवति। प्रेम खल्वस्य नियमस्योदाहरणम्। इदं भवितुमर्हति यत् प्रेमविषयकं काल्पनिकं ज्ञानमेव (in theory) मयि विद्यते, प्रेमविषयकं दार्शनिकं ज्ञानमपि विद्यते, प्रेमलक्षणानि प्रेमचिह्नानि च विज्ञायन्ते मया, प्रेमोत्पत्तिफलविषये चर्चाऽपि कर्तुं शक्यते मया, परन्तु यदि केनचिद् जनेन सह मम प्रेमबन्धो न जातस्तर्हि प्रेमविषयकं सत्यं तत्त्वं मया तथैव नावबोद्धुं शक्यते, यथा पलालगुटिकाया रसः (Flavour of a strawberry) आस्वादनं विना न ज्ञातुं शक्यते। कस्यापि विषयस्य यत् साक्षाद्ज्ञानमव्यवहितज्ञानं वा, तदसाक्षाद्ज्ञानतः प्रतीकाश्रितज्ञानतश्च विलक्षणमेव।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परमया प्रतिभया प्ररोचितः सन्नध्यात्मदृष्टिमान् मानवो जीवनस्य पूर्णतां ज्ञातुमीहते। किञ्च जीवनस्य व्यापारसामान्यमपि स महत्तरपूर्णतादृष्ट्यनुसारेण द्रष्टुं वाञ्छति। स एतत्पूर्णता-तत्त्वाश्रयेणैव स्वकीयं साफल्यमनुभवति, यद्यपि स एतदसम्यग्रूपेणैव द्रष्टुं समर्थः।

अथात्र वयमेकतो विज्ञानशास्त्रं गृहीत्वा न्यायानुगपद्धत्या प्रतीकव्यवहारेण च बाह्य-जगद्विषयकान् मानवानुभावान् व्याकर्तुमीहामहे। इदं जगदेव मानवस्य बाह्यं परिवेशभूतम्। अपरतश्चाध्यात्मदृशा सूक्ष्मतरवस्तुना सह मानवानां संबन्धोऽस्तीति प्रतिपाद्यतेऽस्माभिः। अस्य सूक्ष्मवस्तुनोंऽशभूत एव मानवस्वभावः। अध्यात्मनिष्ठाविज्ञानशास्त्रदृष्टिद्वयपार्थक्यापनयनं यदा स्यात्, तदैव विश्वस्य परमसुखं स्यात्। एवं सत्येव परस्परसंवर्धनं कृतं भवेदध्यात्मविद्यया विज्ञानशास्त्रेण च। रबार्टब्राउनिंगनामधेयेन कविनाऽन्तर्दृष्टिरियमित्थमुपवर्णिता—

"यथाहं ज्ञानाय यतमानस्तथा भवान् प्रेम्णे, यतो हि प्रेमवर्जं ज्ञानं न भवान् स्वीकरोति, अतो वयमेकस्यैव अवियोज्यस्य तत्त्वस्यार्धांशभूताः, यत् तत्त्वमकस्मादेव पुनः परस्परमिलितं स्यादिति किं न कथयितुं शक्यते? यावत् प्रेमरूपो भवान् न जानाति, ज्ञातृरूपोऽहं वा प्रेमाप्लुतो न भवामीति, तावद् नास्माभिः पृथक् स्थातव्यम्। अनयैव रीत्या आवयोः सुष्ठु रक्षा स्यादिति"।

अस्याः संसारव्यापिन्याः समस्याया व्यावहारिकं प्रयोगसिद्धं समाधानं यदि चिकीर्षितं स्यात्, तर्ह्यादौ समस्यायाः स्वरूपं सुष्ठु विज्ञेयमिति मे प्रतिभाति। सर्वाणि ज्ञानान्येकात्म-कानि, एकस्याः परमसत्ताया एव रूपान्तराणि सूक्ष्माणि ज्ञानानि चेति यावत्कालपर्यन्तं वयं न पश्यामः, तावद् मनुष्यगतपरस्परविरोधितत्त्वद्वयसंघातमेवानुभविष्यामः।

प्राच्यदेशीयमननस्य प्रतीच्यदेशीयमननस्य च परस्परात्यन्तसंमेलनं यथा स्यात् तथाऽ-स्माभिः चेष्टितव्यम्। सामान्यत इदं कथनं सम्यगेव यद् जीवनयापनपद्धतेर्यः प्रतीच्यदेशीयादर्शः स विज्ञानशास्त्रसंमतः, यन्त्रविद्याप्रयोगसंमत(Technological)श्च। भवतां भारतीयाना-मादर्शः खल्वध्यात्मदृष्टिबहुलः। भारते स्वस्थवृत्तस्य शिक्षाया जीवनधारणपरिस्थितेरार्थिकशक्तेश्च मानानि (Standard) वर्धनीयानि। प्रतीच्यदेशेन च भारतवर्षाय भूरितरं साहायकं देयमिती-न्द्रियसुखप्रधानजडवादप्रथायाः प्रतीच्यदेशस्य निर्गमनमावश्यकम्, चिन्तनीयं च प्रतीच्यदेशेन यत् सोऽध्यात्मदृशाऽत्यन्तं क्षीण इति। यदि प्रतीच्यदेशो जिज्ञासुर्भवेत्, तदा भवतां भारतवर्षं ज्ञानदाने साहायकं कुर्यात्। प्रतीच्यदेशीयैरस्माभिरिदं विज्ञेयं यद् जडवादीया दृष्टिर्मूढताग्रस्ता। अस्मिन् जडवादे आंशिकं ज्ञानमाश्रित्यैव पूर्णवस्तुस्वरूपं निश्चीयते। प्रतीच्यैरस्माभिरिदं चिन्तनीयं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यन्मानवस्य तान्येव वस्तूनि न रत्नभूतानि यानि मरणकाले मानवेन त्यज्यन्ते, प्रत्युत मानवसङ्गतानि (वस्तूनि) एव, यतस्तान्येव मानवांशभूतानि। इदं सत्यं प्रतीयते यत् पृथिव्याः पूर्वगोलार्धे पश्चिमगोलार्धे चाऽभ्युदयो जातः, परन्त्वेतत् कार्यद्वयमतिमहदुग्रं च। मननकारिषु प्रतीच्यदेशीयेषु मानवेषु भारतवर्षीयां धार्मिकीं दृष्टिं दार्शनिकीं दृष्टिं च प्रति आग्रहो विवर्धमानोऽवलोक्यते। अनेके वेदान्तग्रन्था योगग्रन्थाश्च जनैः पठ्यन्ते। विंशतिवर्षेभ्यः प्राग् इयत्संख्याका ग्रन्था न पठिताः प्रतीच्यदेशवासिभिर्जनैः। इदं विस्मयजनकं प्रतिभाति यत् खीष्टधर्मः पाश्चात्त्यदेशीयान् जनान् अध्यात्मदृशाऽभिसंस्कृतान् कर्तुं न भूयांसं यत्नं कृतवान्। अत्र मम न कश्चित् सन्देहो यत् खीष्टधर्म एतत् कर्तुं प्रभवेदेव, परन्त्वस्य धर्मस्यालोकः स्वार्थाभिवृद्धिपरायणसंघटनात्मकेन आवरकेण क्षीणीकृतः। प्रतीच्ये देशे समाजोन्नतिकारकेषूपायेषु खीष्टधर्मस्यास्य प्रभावो विद्यत इति मम मतम्; कदाचिदस्य प्रभावस्य परिणतिरूपेण कल्याणकारकं राज्यं (Welfare-state) प्रादुर्भूतमिति संभाव्यते।

भारते भवन्तो गान्धि-विनोबा-जयप्रकाशनारायणप्रभृतिभिर्विबुधैर्व्यावहारिकसत्यतामतमभ्युपगच्छद्भिः परमार्थदृष्टिसंपन्नैरुद्बोधिता भारतीयग्रामाणामुन्नयने बद्धधृतयः। ये च भवतां वास्तवार्थानुगा अध्यात्मदृष्टिमन्तो जनाः सन्ति, येऽनेकक्षोभव्यापार(Movements)गतकर्मसु आनुकूल्यं भजन्ते, तान् प्रति ममापरिसीमा प्रशंसादृष्टिर्विद्यते। एतद्विषयेऽत्र किमपि व्याख्यायते।

प्रतीच्यदेशेऽध्यात्मनिष्ठाधिक्यस्योद्दीपनम्, अथवा भारतेऽर्थशिक्षामानाभिवृद्धेराधिक्यम्, एतदुभयोर्मध्ये किं कर्म महत्तरमिति न ज्ञायते मया। प्राच्ये प्रतीच्ये वा देशे ये महान्तो जनास्ते संभूय सूक्ष्माध्यात्मदृष्ट्या गूढं वास्तवं च कमप्यनुरागात्मकं संबन्धं विदधतीति सत्यमेव। इह जगति बहूनामेतादृशानां बुधानां जगदभ्युदयाय प्रयोजनमस्ति। यतो ह्यस्माभिरिह भूमण्डल एव स्वातन्त्र्यमतोऽस्माकं स्थूले व्यावहारिके जीवने साध्यात्मिकी शक्तिरानेतव्या, यस्याः साहाय्येन सर्वे मानवाः सुखं जीवेयुः। ये महत्तरास्तैः क्षुद्राः परिरक्षणीयाः। अध्यात्मबलेन बाह्यं जीवनमिह लोकेऽचिरादेव प्रकाशशीलं सबलं च संपादनीयम्, येनाऽस्माकं जीवनं नित्यस्यापरिणामिनस्तत्त्वस्य सुष्ठु प्रकाशनं कुर्यात्।

इदं भगवतो बुद्धस्य दिव्यं महत्त्वमासीद् यत् स निर्वाणपदप्राप्तिं त्यक्त्वा कारुण्याद् मनुजहिताय प्रायतत। महात्मनो गान्धिनो विनोबामहोदयस्य च महत्ताया इदमेव प्रमाणं

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यदेताभ्यां द्विविधं जीवनमभ्युपगतम्। तद्यथा—एकस्मिन् पक्षे एतावध्यात्मज्ञानभूमावेव स्थितवन्तौ; अन्यस्मिन् पक्षे चैतौ स्थूलजीवनव्यवहारे स्वान्तर्दर्शनं प्रकटितवन्ताविति। स्वादृष्टानुसारेणैव जीवैः कर्मानुष्ठेयम्, परन्तु ममेदं प्रतीयते यदस्मिन् युगे विज्ञानव्यवहारयोर्मेळनमेकतः काङ्क्ष्यते, इदं मेळनं चान्तर्दृष्टिशक्तिभ्यां संवलितं स्यादित्यपीष्यते। जगतोऽस्य भविष्यत्कालिकी स्थितिः प्राच्यदेशीयान् प्रतीच्यदेशीयान् तानेव जनान् आश्रयिष्यति, ये स्वहृदये इमे द्वे तत्त्वे बिभ्रति।

मम तृतीयः प्रस्तावः खल्वयम्—मानवस्वभावविषये विज्ञानसंमताध्ययनार्थं नवीनानां महाविद्यालयानां संस्थानानां च स्थापनमधिकं यथा स्यात् तथाऽस्माभिः प्रोत्साहनं प्रदातव्यम्। बहुविधप्राचीनयोगप्रस्थानान्वितेऽस्मिन् देशे भवन्तो भारतीया नूनं मानवस्वभावविषये बहूनि तत्त्वानि ज्ञातवन्तः, परन्तु पाश्चात्त्यविज्ञानविद्भिर्नेमानि तत्त्वानि विज्ञातानि। किञ्च, भवतां भारतीयैः पण्डितैरेवोक्तं यत् पाश्चात्त्यदेशीयैर्जिज्ञासुभिरिदं मानवतत्त्वं दुरवबोधमेव। यद् ज्ञानमाचरणहीनं तत् प्रायेणानर्थकमेव। पाटलिपुत्रनगरे या विचारगोष्ठी (Seminar) विश्वसंघेन (World Union) अखिलभारतसर्वसेवासंघेन चायोजिता, तत्रेदमभिमतं प्रकटीकृतं यन्मानवतत्त्वाश्रयि अनुसन्धानमेव विज्ञानाध्यात्मशास्त्रयोर्विरोधं समाधातुं समर्थम्।

अथात्र निबन्धमुपसंहर्तुमिच्छामि। आसीत् खलु जार्जविलियमरसेल्नामधेयः कश्चिद् आयर्लैण्डनिवासी (यः १९३५ खीष्टाब्दे मृतः, A-E. इत्येवं स्वसंक्षिप्तनाम्ना येन गद्यानि पद्यानि च विरचितानि) तद्विषये मया समासतः किमप्युच्यते। न कदाचित् तत्रभवताऽयं देशस्तेन परिदृष्टः। यद्यप्युपनिषदस्तस्य प्रियाः पाठ्यग्रन्था आसन्। अन्वितश्च स बहुभिर्गुणैः। अतिनिष्ठश्च स रहस्यवादे, यद्यपि तस्य जीवनस्य भूयान् भागो व्यावहारिककर्मबहुलो जातः। आसीच्च स कविप्रतिभान्वितः। अचिन्तयच्च यदहं स्वरचितैः कतिपयपद्यैः संस्मृतो भविष्यामीति। शिल्पिप्रतिभयाऽपि समन्वितः सः। स्वयमेव च सोऽस्यां विद्यायामभिरतो बभूव। बहूनि वर्षाणि यावत् स डब्लिन्-नगरे स्थितवान्। कृषिसंबन्धिन्यर्थशास्त्रे तस्य रुचिर्जाता। ततश्च स दरिद्राणामृणग्रस्तानामायर्लैण्डनिवासिनामपि साहायकमकरोत्। अनया रीत्या स दशवर्षाणि पञ्चदशवर्षाणि वा यावत् तत्र स्थितवान्, कर्षकपशुपालकादीनां मध्ये विचरन् स साप्ताहिकीं "दि आइरिश् स्टेट्स्मन" (The Irish Statesman) नाम्नीं काञ्चन पत्रिकां सम्पादितवान्। आयर्लैण्डदेशे विरोधभूयिष्ठायां राजनीतौ सत्यामपि तत्रत्येषु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विज्ञानशास्त्रम् अध्यात्मनिष्ठा च

मननशीलेषु जनेष्वस्याः पत्रिकायाः प्रभावाधिक्यमासीत्। यदाऽयं जनश्चत्वारिंशद्वर्षीणो जातः, तदा तस्य चार्ल्सवीक्स(Charles Weekes)-नामा बान्धवो लण्डननगरतस्तं प्रति किमपि पत्रं लिलेख। पत्रेऽस्मिन् तेन सयुक्तिकमिदं लिखितं यद् आयर्लैण्डसदृशक्षुद्रदेशसेवां हित्वा कस्यचिद् बृहत्तरस्य क्षेत्रस्य सेवाऽभ्युदयसंपादकं कर्म चानुष्ठेये इति। अस्य पत्रस्य यदुत्तरं जार्जविलियमरसेल्महोदयेन प्रदत्तम्, तस्य कियानंश इह उद्ध्रियते—

"तात! आत्मोपमयैव साफल्यमकृतकार्यता च निश्चेतव्ये। त्वयेदमिष्यते यदहं प्रसिद्धः स्यामिति, विज्ञसमीक्षकप्रशंसितानां प्रौढानां रोचकानां च ग्रन्थानां प्रणेताऽपि स्यामिति च। एतत् सर्वं मया कर्तुं शक्यते, यद्यप्येवं कृते सत्यहमसुखी क्लिष्टः पराजितश्च भवेयम्। यदेव तत्त्वं शुभकारकमिति मया मन्यते तदर्थमेव मया प्रयत्यते। सर्वे जना मां जानीयुरिति न मया काङ्क्ष्यते। मानुषस्य मम विख्यातिः प्रसारिता स्यादिति न काम्यते मया। या खलु सर्वोत्कृष्टा स्थितिस्तस्यां मया स्थीयत इति मया न भाषितुं शक्यते। नान्योऽपि कश्चिदेवं कथयितुमीष्टे। बहूनां जनानां यादृश्यधोगतिर्दृश्यते न मम तादृश्यवनतिर्जाता! अहं स्वर्गं गमिष्यामि विजयगर्वं विहाय; परन्तु यदि ममाधोगमनं स्यात्, तर्हि नाहं रोत्स्यामि न वाहं स्वपरिवेशमाश्रित्य उद्वेजकं वचः कथयिष्यामि" इति।

मया चिन्त्यते यदेकदा जार्जविलियमरसेल्महोदयेन इदमवधारितं यत् तन्निष्ठा विशिष्टा गुणाः सुष्ठु विनियुक्ता न वेति। मरणादेकमासात् पूर्वं तेन सखायं कन्स्टेन-सिटवेल(Consane Sitwell)नामधेयं प्रतीदं विलिखितम्—

"स्वकर्मानुरोधतोऽहं रहस्यतत्त्वान्वेषणतः पृथगपि बहून् विषयान् चिन्तितवान्। ते यथा—वार्ताशास्त्रम् (Economics), अर्थशास्त्रम् (Politics), श्रमिकसमस्या, कला (Art), साहित्यमिति। एतच्छास्त्राध्ययनेन मम चिन्तनं विपरिणतं जातम्। अध्यात्मदृशा यतोऽहमसुखी न जातः, अतः स्वात्मानं सम्यग्दर्शिनं जानामि। यद्यहं विपथमगमिष्यं तर्हि नैतादृशं चिन्तनमकरिष्यम्। अन्तर्बहिश्चास्माभिर्निरीक्षणीयम्। नूतनतत्त्वाधिगमायास्माभिर्बहिर्गम्यते। यथा वयं ज्योतिःस्वरूपे परिणता भविष्यामस्तथास्माभिरन्तःप्रवेशनं कार्यम्। अनेनैवाऽपरिणामिनी गतिराविष्कृता भविष्यति" इति।

अस्य महाशयस्य जीवनमन्तर्निनादानुसारेण प्राचलत्। नादोऽयं सर्वमानवभाषितान् शब्दानतिशेते। याऽन्तःप्रज्ञा स्वात्मनोपस्थापिता, सा तेनाभ्युपगता। स्वार्थं विहाय पुरोवर्ति-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मार्गम् (उन्नतिसाधकं मार्गम्) एव सोऽनुसृतवान्। अथात्र निबन्धोपसंहारकालेऽस्योदात्तं वाक्यमुद्ध्रियते—

"कालातीताल्लोकादादर्शभूता जना अवतरन्ति, परन्त्वेतैर्जनैः कालसंबद्धैरेव भवितव्यम्। इदमत्र ज्ञेयं यदस्य जगतः स्वकीयं श्रेयो विद्यते। यदि च वयमस्मै विधिप्रदिष्टमधिकारं न दास्यामस्तर्हि नेदं जगदस्माकमपि निर्देशं ग्रहीष्यति। एवं सति परलोकेहलोकयोर्द्वैधीभावः संजायत एव। एतादृशी स्थितिः विपर्यस्तेति मन्तव्यम्" इति॥

अनुवादकः—

श्रीरामशङ्करभट्टाचार्यः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भट्टप्रभाकरयोः प्रस्थानभेदः

श्रीरामचन्द्रशास्त्री खनङ्गः, वा. सं. वि. वि. वाराणसी।

मीमांसायां त्रीणि मतानि बहोः कालादारभ्य प्रचलितानि। तानि यथाक्रमं भट्टमतं प्रभाकरमतं मिश्रमतं चेति। तेषु 'मुरारेस्तृतीयः पन्थाः' इत्याभाणकानुसारेण मिश्रमतं स्वल्पेनैव कालेन केवलं तन्त्रान्तरेषु नामोल्लेखपूर्वकं मिश्रमतमिति रीत्या स्थितम्। तस्य प्रचारो ग्रन्थरूपेण इदानीं नोपलभ्यते, परं भट्टमतं प्रभाकरमतं च व्याख्यारूपेण तट्टीकारूपेण चाद्यावधि विद्वन्मण्डलीषु विराजमाने वर्तेते। भट्टप्रभाकरयोर्मते विद्वन्मण्डलीषु प्रकृष्टं स्थानं प्राप्ते प्रस्थानरूपेण भेदं गते।

अयं भट्टप्रभाकरयोः प्रस्थानभेदः कुत्रचिदविभक्तः कुत्रचिच्च विभक्तो वर्तते। अत एव पार्थसारथिकृतन्यायरत्नमालाया व्याख्यानावसरे रामानुजाचार्यो लिखति—

अविभक्तविभक्तमार्गयोर्मतयोर्भट्टगुरूपदिष्टयोः।
उभयोरपि पार्थसारथिः प्रथितः प्राथमिकेऽभियोगवान्॥ (नायकरत्नम्)।

अनयोः प्रस्थानयोर्न केवलं प्रमाणविषय एव भेदः, किन्तु प्रमेयविषये शास्त्रविषयेऽधिकरणरचनाविषयेऽपि महान् भेदः। तत्र प्रथमतः प्रमाणविषये तयोर्भेदः प्रतिपाद्यते।

प्रमाणविषये भेदः

तत्र प्रमाकरणं प्रमाणमिति द्वयोरनुमतम्। तद्विभागे परं तयोर्मतभेदः। अस्य स्फुटीकरणाय पट्टिका प्रदर्श्यते—

भट्टमते प्रमाणानि	प्रभाकरमते प्रमाणानि
प्रत्यक्षमनुमानं शब्द उपमानमर्थापत्तिरनुपलब्धिश्च।	प्रत्यक्षमनुमानं शास्त्रमुपमानमर्थापत्तिश्च।

यथाह शालिकाचार्यः प्रकरणपञ्चिकायां प्रमाणपारायणे—

तत्र पञ्चविधं मानं प्रत्यक्षमनुमा तथा।
शास्त्रं तथोपमानार्थापत्ती इति गुरोर्मतम्॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भट्टमतमाह नारायणो मानमेयोदये—

प्रत्यक्षमनुमानं च शाब्दं चोपमितिस्तथा ।
अर्थापत्तिरभावश्च षट् प्रमाणानि मादृशाम् ॥

भावे ल्युडन्तप्रमाणशब्दार्थस्तु भट्टमते करणदोषबाधकज्ञानरहितमगृहीतग्राहि ज्ञानम् । यथाह पार्थसारथिः शास्त्रदीपिकायाम्— "न च साक्षाद् बाधकमस्तीत्यव्यतिरेकशब्देनोच्यते, अनुपलब्धार्थत्वाच्च । नानुवादलक्षणमप्रामाण्यमस्तीति 'अर्थेऽनुपलब्धे' इत्यनेनोक्तम् । एतच्च विशेषणत्रयमुपाददानेन सूत्रकारेण कारणदोषबाधकज्ञानरहितमगृहीतग्राहि ज्ञानं प्रमाणमिति प्रमाणलक्षणं सूचितम् ।

प्रभाकरमते त्वनुभूतिः प्रमाणम् । यथाह शालिकाचार्यः—"अनुभूतिः प्रमाणं च" (प्र० पञ्चिका प्र० पारायणम्) इति ।

कुमारिलमते—इन्द्रियार्थसन्निकर्षजं ज्ञानं प्रत्यक्षम्, तत्कारणभूतानीन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्राणि मनश्चेति षट् । तत्र चक्षुर्नाम कनीनिकान्तर्गतं तेजः । जिह्वाग्रगस्तोयांशो रसनम् । गन्धग्राहकं पार्थिवमिन्द्रियं घ्राणम् । स्पर्शग्राहकं वायवीयमिन्द्रियं त्वक् । दिशः श्रोत्रमित्यभियुक्तोक्तिगताल्लिङ्गाद् दिग्भागः कर्णशष्कुल्यवच्छिन्नः श्रोत्रम् । सुखदुःखाद्युपलब्धिसाधनमन्तरिन्द्रियं मनः ।

सन्निकर्षास्तु—संयोगः संयुक्ततादात्म्यं संयुक्ततादात्म्यतादात्म्यं चेति त्रयः ।

प्रभाकरमते—साक्षात्प्रतीतिः प्रत्यक्षम् । तच्च मेयमातृप्रमास्विति त्रिपुटं भवति । यथाह शालिकाचार्यः—"साक्षात्प्रतीतिः प्रत्यक्षं मेयमातृप्रमासु सा" (प्र० प० प्र० पा०) इति । प्रभाकरविषये नन्दिकेश्वरोऽपि साक्षात्प्रतीतिः प्रत्यक्षम् । साक्षात्प्रतीतिः स्वरूपप्रतीतिः । स्वस्यैव रूपं स्वरूपमसाधारणरूपमित्यर्थः । यस्य वस्तुनो यदसाधारणस्वरूपम्, तेनैव रूपेण या व्यवहारयति सा साक्षात्प्रतीतिः । जात्यादिविशिष्टस्य सविकल्पज्ञानस्य साधारणाकारविषयत्वात् प्रत्यक्षत्वं न स्यादिति चेन्न, असाधारणाकारेणापि विषयीकरणाद् लक्षणसमन्वयः । अनुमाने तु साधारणभूतव्यापकाकारेणैव सम्बन्धप्रतीतेर्न साक्षात्त्वमिति । इन्द्रियाणि तु पूर्वोक्तान्येव । तेषां स्वरूपमपि पूर्वोक्तमेव । श्रोत्रं परं कर्णशष्कुल्यवच्छिन्नं नभः । सन्निकर्षास्त्वेतन्मते—संयोगः, संयुक्तसमवायः, समवाय इति त्रेधा । मतद्वयेऽपि निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षद्वैविध्यम् ।

अनुमानं भट्टमते—व्याप्यदर्शनादसन्निकृष्टेऽर्थे विज्ञानम् । प्रभाकरमतेऽपि तदेव ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भट्टप्रभाकरयोः प्रस्थानभेदः

यथाह शालिकाचार्यः—

ज्ञातसम्बन्धनियमस्यैकदेशस्य दर्शनात् ।
एकदेशान्तरे बुद्धिरनुमानमबाधिते ॥ इति ।

उभयमतेऽवयवास्त्रयः-प्रतिज्ञाहेतूदाहरणरूपाः । हेत्वाभासा अपि त्रय एव—असिद्धोऽनैकान्तिको बाधकश्चेति । तत्रासिद्धः पञ्चविधः—स्वरूपासिद्धः, संबन्धासिद्धः, व्यतिरेकासिद्धः, आश्रयासिद्धः, व्याप्यत्वासिद्धश्चेति । अनैकान्तो द्विविधः—सव्यभिचारः सप्रतिसाधनश्चेति । एतत्सर्वं श्लोकवार्त्तिकतः प्रकरणपञ्चिकातश्च सम्यग् ज्ञातुं शक्यते ।

भट्टमते—पदैः स्मारितैः पदार्थैर्यदसन्निकृष्टविषयं वाक्यार्थज्ञानं तच्छाब्दं प्रमाणम् । एतेऽभिहितान्वयवादिनः । एतन्मतप्रतिपादनावसाने पार्थसारथिमिश्रैर्न्यायरत्नमालायामभिहितम्—

तस्मान्न वाक्यं न पदानि साक्षाद् वाक्यार्थबुद्धिं जनयन्ति किन्तु ।
पदस्वरूपाभिहितैः पदार्थैः संलक्ष्यतेऽसाविति सिद्धमेतत् ॥

प्रभाकरमते—शब्दविज्ञानापेक्षादात्ममनःसन्निकर्षाद् यददृष्टविषयं ज्ञानं तच्छास्त्रं नाम प्रमाणम् । यथाह शालिकनाथः—"शास्त्रं तु शब्दविज्ञानाद् यदसन्निकृष्टार्थविज्ञानम्" (प्र० प० प्र० पा०) इति ।

प्राभाकरा अन्विताभिधानवादिनः । एतेषां मते पदान्येव वाक्यम् । पदार्थ एव वाक्यार्थः । तत्र पदान्येव प्रमाणम् । उक्तं चैतत् शालिकनाथेन प्र० प० वाक्यार्थमातृकायाम्—

यद् यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेन तेनान्वितः स्वार्थः पदैरेवाभिधीयते ॥ इति ।

भट्टमते शब्दो द्रव्यम् । प्रभाकरमते तु स गुण इति भेदः । उपमानं तु मतद्वयेऽप्येकरूपम् । यथाह मानमेयोदये नारायणः—

दृश्यमानार्थसादृश्यात् स्मर्यमाणार्थगोचरम् ।
असन्निकृष्टार्थसादृश्यज्ञानं ह्युपमितिर्मता ॥

शालिकाचार्योऽपि—

सादृश्याद् दृश्यमानाद् यत् प्रतियोगिनि जायते ।
सादृश्यविषयं ज्ञानमुपमानं तदुच्यते ॥ (प्र० प० प्र० पा०)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भट्टमते दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेत्यर्थापत्तेर्द्वैविध्यम्। प्रभाकरमते श्रुतार्थापत्तिर्नास्ति। अपरिपूर्णस्य वाक्यस्याऽन्वयबोधार्थं यत्र शब्दोऽध्याह्रियते तत्र श्रुतार्थापत्तिः। यथा—'द्वारं द्वारम्' इत्यत्रान्वयसिद्धये पिधेहीति पदाध्याहारः। प्राभाकरास्त्वत्र पिधानरूपस्यार्थस्यैवाध्याहारं कुर्वन्तीति श्रुतार्थापत्तिं नाङ्गीकुर्वन्ति।

अनुपलब्धिप्रमाणं तु प्रभाकरैरनङ्गीकृतमिति प्रमाणविषये भट्टप्रभाकरयोर्मतभेदः प्रदर्शितः। प्रमेयविषयस्तु प्रदर्श्यते।

प्रमेयविषये भेदः

तत्र तावद् भट्टमते प्रमेयं पञ्चविधम्—द्रव्यं जातिर्गुणः क्रियाऽभावश्चेति। यथाह नारायणो मानमेयोदये—

वयं तावत् प्रमेयं तु द्रव्यजातिगुणक्रियाः।
अभावश्चेति पञ्चैतान् पदार्थानाद्रियामहे॥ इति।

तन्त्ररहस्ये गुरुमते त्वष्टौ पदार्थाः—द्रव्यगुणकर्मसामान्यसमवायशक्तिसंख्यासादृश्यानीति। तत्र द्रव्यमेषां मते नवविधम्, पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभेदात्। भट्टमते तु द्रव्यमेकादशविधम्—"पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनःशब्दतमांसि" (मानमेयोदये) इति। तत्र गन्धवती पृथिवी। शरीरं तु पार्थिवमेव। इदानीन्तनस्त्रीपुंसपरम्परायाश्च तथा दर्शनात्। उद्भिज्जं तु वृक्षादिकं शरीरमिति भाट्टाः। प्राभाकरास्तु—उद्भिज्जं वृक्षादिकं न शरीरमिति प्रतिपादयन्ति। तस्यायमाशयः—यत् खलु भोगायतनं तच्छरीरमिति कथ्यते। वृक्षादौ भोगायतनत्वं नास्ति, सर्वस्यैव वेदस्य तन्मते कार्यपरत्वात् "श्मशाने जायते वृक्षः" इति स्मृतिवचनं न तन्मूलं संभवतीति।

भाट्टास्तु वेदस्य सिद्धार्थेऽपि प्रामाण्यमङ्गीकुर्वाणा अस्याः स्मृतेर्वेदमूलकत्वेन प्रामाण्यात् तद्बलादामिषादिसदसद्भावनिबन्धनपुष्टिह्रासादिदर्शनेन दाहच्छेदादिभिरितरशरीरवदेव वैगुण्यावाप्तिदर्शनेन च भोगायतनत्वसिद्ध्या तदपि शरीरमिति स्वीकुर्वन्ति। अतो भट्टमते जरायुजाण्डजस्वेदजोद्भिज्जभेदात् चतुर्विधं शरीरम्। प्रभाकरमते तु जरायुजाण्डजस्वेदजभेदेन त्रिप्रकारमेव। उभयमतेऽपि वायुः प्रत्यक्षः। आत्मा भट्टमते मानसप्रत्यक्षः। प्रभाकरमते तु मेयानुभवेषु ज्ञानाश्रयतया प्रकाशते। सर्वाऽपि संविदस्य मते त्रितयप्रकाशिका। अत एवात्मा विषयाननुविद्धो नावभासते। संवित्फलभागित्वेऽपि पुरुषस्य न कर्मता, परसमवेतक्रियाफलभागित्वाभावादिति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भट्टप्रभाकरयोः प्रस्थानभेदः

पृथिव्यादिवद् नीलरूपवत्त्वान्निर्गन्धत्वाच्च तमो द्रव्यान्तरमिति भाट्टाः। अपवारितालोकं भूभागादिकमेव तम इति प्राभाकराः। गुणास्तु भट्टमते—रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नसंस्कारध्वनिप्राकट्यभेदाच्चतुर्विंशतिसंख्याकाः।

प्रभाकरमते तु रूपरसगन्धस्पर्शपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्मभेदाद् द्वाविंशतिसंख्याकाः। तत्र बुद्धिस्तु प्रभाकरमते स्वयंप्रकाशा। भट्टमते तु प्राकट्यानुमेया प्राकट्यान्यथानुपपत्तिप्रसूतार्थापत्तिगम्या वा। कर्म भट्टमते प्रत्यक्षम्। प्रभाकरमते तु संयोगविभागपरम्परया नित्यानुमेयम्। जातिस्तु भट्टमते आश्रयतो भिन्नाऽभिन्ना प्रत्यक्षज्ञानगोचरा। प्रभाकरमते तु—आश्रयतो भिन्ना प्रत्यक्षज्ञानगोचरा। शब्दत्वसत्ताब्राह्मणत्वजन्यालात्वादीनां जातित्वं स्वीकुर्वन्ति भाट्टाः। प्राभाकरास्तु नैतेषां जातित्वं स्वीकुर्वन्ति। प्रभाकरोक्तयोः शक्तिसंख्ययोर्भट्टमते गुणेष्वन्तर्भावः। सादृश्यं तु न पदार्थान्तरम्, किन्तु गुणावयवसामान्ययोग एव। प्रागभावादिभेदेन चतुर्विधोऽभावः प्रभाकरैरङ्गीकृत इति संक्षेपतो भट्टप्रभाकरयोः पदार्थविषये भेदो निरूपितः।

शास्त्रविषये भेदः

अथेदानीं शास्त्रविषये भेदः प्रदर्श्यते। तत्र तावद् मीमांसाशास्त्रे द्वादशाध्यायाः। तेषु प्रथमाध्याये विध्यर्थवादमन्त्रस्मृतिसदाचारनामधेयस्तुतिशक्त्याख्यान्यष्टौ प्रमाणानि धर्मविषये निरूपितानि। प्रभाकरमते तु विधिप्रामाण्यनिरूपणं प्रथमाध्यायार्थ इति। द्वितीयाध्याये भट्टमते कर्मभेदनिरूपणम्, प्रभाकरमते तु शास्त्रभेदनिरूपणम्। तृतीयाध्याये तूभयमतेऽपि शेषत्वनिरूपणम्। अवान्तरप्रकरणं महाप्रकरणं चेति प्रकरणद्वैविध्यं भट्टमते, प्रभाकरमते त्ववान्तरप्रकरणं नास्ति। चतुर्थे भट्टमते प्रयोज्यप्रयोजकभावनिरूपणम्, प्रभाकरमते तु ग्राहकग्रहणाख्योपादानप्रमाणगम्यं शेषत्वप्रयुक्त्यधिकारोत्पत्त्याख्यचतुष्टयनिरूपणम्। पञ्चमे क्रमनिरूपणम्। स च विधेय इति भाट्टाः, न विधेय इति प्राभाकराः। षष्ठेऽधिकारनिरूपणमुभयमतेऽपि। सप्तमे सामान्येनाष्टमे विशेषतश्चातिदेशनिरूपणमुभयमतेऽपि तुल्यम्। तथैव नवमे ऊहः। दशमे भट्टमतेऽतिदेशतोऽप्राप्तानां बाधः, प्रभाकरमते त्वतिदेशतः प्राप्तानां बाधः। तन्त्रप्रसङ्गयोरुभयमतेऽपि साम्यमिति शास्त्रविषये भेदो निरूपितः। अधिकरणरचनाविषये तु भेदो विस्तरभयान्न लिख्यते। सुधीभिस्तौतातिकमततिलकतोऽनुसन्धेय इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भाट्टप्राभाकरयोर्मतभेदसंग्रहः

प्राभाकरेभ्यो भाट्टाः कुत्र कुत्र भिद्यन्ते तदधस्तनेभ्यः श्लोकेभ्योऽवगन्तुं शक्यते—

संविदोऽस्वप्रकाशत्वमन्यथाख्यातिसंशयौ ।
कर्म दिक्कालवियतां प्रत्यक्षज्ञानगम्यता ॥
ध्वनेर्विभुत्वद्रव्यत्वे मनसोऽस्पन्दवैभवे ।
भिन्नाभिन्नत्वमेकस्य समवायस्य नास्तिता ॥
विभुद्वयस्य संयोगो नित्यत्वं तस्य चात्मनः ।
ज्ञेयत्वं मुक्तिवेलायां नित्यानन्दानुभाविता ॥
अभावप्रकटत्वं च शक्तेरननुमेयता ।
गुणत्वमन्धकारस्य पुंगिरां स्वार्थमानता ॥
पृथिवीत्वादिसामान्यरूपत्वाद्याश्च जातयः ।
अनन्विताभिधानं च वेदस्याकार्यमानता ॥
श्रुतार्थापत्तिरित्येषु स्थलेषु प्रतियोगिनः ।
प्राभाकरा निराकार्या भाट्टमार्गानुसारिणा ॥ (बृहतीभूमिका)

अन्विताभिधानाभिहितान्वयवादयोः कतरो ज्यायान् ?

अथेदानीमन्विताभिधानाभिहितान्वयवादयोः को वादो ज्यायानिति विचार्यते । व्युत्पन्नस्य पुरुषस्य तावद् लोके वाक्यादर्थप्रतीतिर्जायत इति तावदविवादम् । तत्र वैयाकरणाः क्रमिकैराशुतरविनाशिभिर्वर्णैः प्रत्येकं यौगपद्येन च वाक्यार्थप्रतीतेरसंभवात् तत्तद्वर्णाऽभिव्यङ्ग्यमखण्डं स्फोटाख्यं शब्दतत्त्वमविभागं मन्यन्ते । विज्ञानवादिनो बौद्धा बाह्यार्थमपलपन्तो विज्ञानमेवैकं तत्त्वमिति मन्यमाना वाक्यमपि ज्ञानं वाक्यार्थमपि ज्ञानमेव, तत्र शब्दात्मकेन ज्ञानेनाऽर्थात्मकं ज्ञानं जन्यत इति कथयन्ति । नैयायिका वैशेषिकाश्च पदार्थप्रतीतिं वाक्यार्थप्रतीतेरङ्गं मन्यमानाः पदसमुदायात्मकाद् वाक्याद् वाक्यार्थप्रतीतिरुपजायत इति मन्यन्ते । पदान्येव पदार्थान्तरान्वितं स्वार्थमभिदधतीति प्राभाकराः । पदैरभिहिताः पदार्था एव वाक्यार्थं प्रतिपादयन्तीति भाट्टाः । तत्र वैयाकरणमतं वर्णातिरिक्तस्य पदस्य पदातिरिक्तस्य च वाक्यस्य योग्यानुपलब्धिनिरस्तसत्त्वस्य स्वीकारादयुक्तम् । यत्त्वेकं पदमेकं वाक्यमिति व्यवहारः स चैकार्थप्रतिपत्तिनिमित्तः । भवति हि बहूनामेककार्यनिबन्धनमेकत्वम् । यथा—इष्टिपशुसोमाना-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मेकस्वाराज्यफलनिबन्धनो राजसूय इत्येकत्वम्। अत एवार्थैकत्वमजानतां नास्त्येकपदावमर्शः। यदा वर्णा एव प्रत्यक्षगोचरा नान्यत् स्फोटाख्यं तत्त्वं तदा वर्णानन्तरं जायमानार्थप्रतीतिस्तन्निमित्तैवेति स्वीकर्तव्यम्। तत्र विभूनां वर्णानां नित्यानां च कालकृतं देशकृतं च नैरन्तर्यासंभवेऽपि व्यञ्जकानां ध्वनीनां क्रमवर्तित्वात् तैर्वर्णेष्वभिव्यज्यमानेषु तदीयक्रमो मुखे आदर्शाल्पत्वमहत्त्वयोरिव वर्णेषु समारोपितोऽप्यर्थाभिधानाङ्गतां भजते। उक्तं च श्लोकवार्त्तिके—

एवं ध्वनिगुणान् सर्वान् नित्यत्वेन व्यवस्थिताः।
वर्णा अनुपतन्तः स्युरर्थभेदावबोधकाः॥ इति।

बौद्धमतं तु बाह्यार्थसाधनादेवापास्तम्। नैयायिकवैशेषिकादयो वाक्याद् वाक्यार्थप्रतीतिं मन्यमानाः पदपदार्थसंगतिसंवित्तत्र कमिवोपकारं करोतीति कथयन्तु। पदार्थज्ञानमिति चेत्? इदं तावदालोच्यताम्—वाक्याद् वाक्यार्थप्रतीतौ पदजनितपदार्थज्ञानेन कस्तावदुपकारः। कोऽपि नाम कल्प्यत इति तु तर्ह्यदृष्टकल्पनैव दोषः।

अत्र प्राभाकराः स्वकीयं सिद्धान्तं व्यवस्थापयन्तष्टीकाकारमुखेनाहुः—

पदार्थानेव वाक्यार्थं मिथः संगतिशालिनः।
आचक्षतेऽभिधीयन्ते पदैस्ते च तथाविधाः॥

पदान्येव वाक्यम्। पदार्था एव वाक्यार्थ इति हि तन्मतम्। यतोऽन्वितेषु व्युत्पत्तेरन्विता एवार्थाः पदैरभिधीयन्ते, अतोऽन्वितार्थपराणि पदान्येव वाक्यमिति। अत्रेदमालोचनीयं यत् पदानामन्विते शक्तिरुत शुद्धे पदार्थे। तत्र—

पदानन्तरजाता हि संविदन्वितगोचरा।
अन्वितार्थाभिधायित्वं पदानामुपकल्पयेत्॥

वृद्धव्यवहारे पदश्रवणानन्तरजायमाना हि संविद् विशिष्टविषयव्यवहारदर्शनेन विशिष्टविषयाऽनुमीयते। तदनन्तरं शक्तिग्रहोऽपि विशिष्टविषय एव जायत इत्यन्विताभिधानवादिनां मतम्। पदैः पदार्था अभिधीयन्ते, तैश्च वाक्यार्थावगतिरिति मते तु प्रमाणान्तरप्रतीतैरर्थैर्वाक्यावगतिः स्यात्। शब्दप्रतीतानामर्थानामेवान्वितप्रतिपत्तिकारणत्वमित्यङ्गीकारे शक्तिकल्पनागौरवमापतति। तद्यथा—पदानां तावत् पदार्थाऽभिधानशक्तिरेका, अर्थानां चान्वितप्रतिपादनशक्तिर्द्वितीया, पदानामर्थेष्वन्विताभिधानशक्त्यनुकूला शक्तिस्तृतीयेति शक्तित्रयकल्पनमभिहितान्वयवादिनाम्। अन्विताभिधानवादिनां त्वन्वितेऽन्वये च शक्तिद्वयकल्पनमिति लाघवम्।

किञ्च, प्रथमावगतानामेव पदानामन्विताभिधायकत्वमुचितम्, न त्वनन्तरप्रतीतानामर्थानामिति। एवं शाब्दत्वमपि समञ्जसं भवत्यन्वितप्रतीतेः। किञ्च, पदार्थसामान्यस्य विशेषा खल्वन्वितावस्था। सामान्येन नियतविशेषाक्षेपः कुतः? यथा गामानयेत्यत्र गोपदेन सास्नादि-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मानर्थः प्रतीतः स्वीयां विशेषावस्थामाक्षेप्तुं समर्थोऽपि किं कारणं पदानयनान्वितामेव गामुपस्थापयति ? न बन्धनान्वितां गाम् ? अतोऽकामेनापि गुरुमतं शरणीकरणीयम् । यत्र—

तेन तेनान्वितः स्वार्थः पदैरेवाभिधीयते । यद् यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ॥

(प्र० प० वाक्यार्थमातृका)

इति न्यायेन पदान्तरोपस्थितानयनान्वितैव गौर्गामानयेति वाक्ये प्रतीयते । यद्यप्यस्मिन् मते प्रत्यक्षेणाश्वे सन्निहिते गौरानीयतामित्युक्तेऽश्वान्वितं कस्मान्न प्रतिपाद्यते ? गवान्वितमेवानयनमानयतिना प्रतिपाद्यते, उभयोरपि गवाश्वयोः सन्निहितत्वात् । तथापि यावन्ति हि पदानि संहत्य प्रयुज्यन्ते तावतां सति संभवे संहत्यैव विशिष्टार्थप्रतिपत्तिपरत्वं लोके दृष्टम् । तच्च श्रुतयोरेवान्वये निर्वहत्यन्यथा बाध्येत । तस्मात् पदान्येवान्विताभिधायीनीति ।

अत्राभिहितान्वयवादिन आहुः—यथा प्रत्यक्षेणाश्वे उपस्थापितेऽपि गवान्वितमेवानयनं गामानयेत्यत्र प्रतीयते, एकवाक्यताबलात् ; तथाऽस्मत्पक्षेऽपि पदार्थसामान्येन नियतविशेषाक्षेपोऽप्येकवाक्यताबलात् । यत एव चायं नियमः पदान्तरसमधिगम्याद् वाक्यादेव सिध्यति, न पदार्थमात्रादत एव शब्दस्य प्रमाणान्तरत्वम् । उक्तं च वार्त्तिके—

तत्रानैकान्तिकानेकवाक्यार्थोपप्लवे सति ।
अन्योन्यात्मव्यवच्छेदादेकत्र स्थाप्यते मतिः ॥
अतोऽन्वयातिरेकाभ्यामनुमाने यदिष्यते ।
एकार्थैकान्तिकत्वं तदन्यत्रैवात्र लभ्यते ॥ इति ।

सर्वथा तावत् पदग्रहणानन्तरं पदार्थेषु प्रतीतेषु वाक्यार्थावगतिरित्यविवादम् ।

किञ्चाऽव्यवधानात् पदार्थावगतेरेव कारणत्वं कल्पयितुं युक्तम्, न पदानां व्यवधानात् । अपि च दीर्घतमेषु वाक्येषु पदानुसन्धानाभावेऽपि पदार्थानुसन्धानमात्रेण वाक्यार्थः प्रतीयत इति सर्वजनीनमेतत् । तेन दृष्टानुगुण्यमपि पदार्थनिमित्तकत्वे न पदनिमित्तकत्वे । उक्तं च वार्त्तिके—

पदार्थानां च सामर्थ्यं गम्यमानमपह्नुतम् ।
आनन्तर्याद्धि वाक्यार्थस्तद्धेतुत्वं न मुञ्चति ॥ इति ।

किञ्च, पक्षद्वयेऽप्येकार्थेष्वनेकार्थेषु च पदेषु शक्तिकल्पनासाम्येऽपि पर्यायपदप्रयोगेष्वन्विताभिधानवादिनां शक्तिकल्पनागौरवं वरीवर्ति । 'अक्षैर्दीव्यति, अक्षमारोहति, अक्षैः पश्यति' इत्यादिषु पक्षद्वयेऽपि षट् शक्तयः । परं च 'पाणिना भुङ्क्ते, करेण प्रहरति, हस्तेनादत्ते' इत्यत्रान्विताभिधानवादिनां त्रयाणां शब्दानामन्वितेऽन्वये च शक्तिकल्पने षट् शक्तयः स्युः । अभिहितान्वयवादिनां तु पदानां तिस्रः, अर्थस्य चैकेति चतस्रः । एवं यत्रैकस्यार्थस्य वाचकाः शतशब्दास्तत्र शतानां शब्दानां शतशक्तयोऽर्थस्य चैकेत्येकशतशक्तयः । अन्विताभिधानवादिनां द्विशतशक्तयः । अनयैव रीत्या शक्तिकल्पनागौरवमूह्यमिति शम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मस्वरूपविमर्शः

श्रीदेवदत्तशर्मोपाध्यायः, प्राचीनव्याकरण-दर्शनविभागाध्यक्षः, वा०सं०वि०वि०वाराणसी।

यज्जाग्रतो दूरमुपैति दैवं तदु सुप्तस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ (यजु० ३४-१)
वशे यस्य विश्वं समस्तं सदास्ते यदाभासतो भाति यद् वै विचित्रम्।
न जानन्ति यं तत्त्वतो योगिनोऽपि चिदानन्दरूपं तमीशं प्रपद्ये ॥

चार्वाकोपस्थापितः पूर्वपक्षः

कैश्चिद् वैदिकमार्गपरिभ्रष्टैश्चार्वाकादिचरणानुयायिभिः पूर्वपक्षिभिरित्थं विसंभण्यते यद् भोः शास्त्राद्यनुरागिणो ब्रह्मस्वरूपविमर्शिनो वैदिकशिरोमणयः! किञ्चिन्निभालयन्तु भवन्तो यत् "सति मूले शाखाः पत्राणि च भवन्ति" इति लौकिकाभाणकं प्रसिद्धम्, अनुभवोऽपि च समेषां समनसां पुरुषप्रवराणां तादृशः। तथा च सति ब्रह्मणि तत्स्वरूपविचारो भवितुमर्हति, नान्यथा। ब्रह्म च जगतीतले न समस्त्येव। किञ्च, 'ब्रह्म' 'आत्मा' इति च पर्यायवाचकौ शब्दौ। यदि च 'ब्रह्म' अर्थादात्मा संसारे संभवेत् तदा किमर्थं जनानां बौद्धकार्यकर्तृप्रवीणानामपि वाक्कील(वकील)प्रभृतीनां तद्विषये संदेहः समुत्पद्येत। कथं वा सर्वशक्तिमत् सद् विद्यमानं ब्रह्म स्वाभिमतवेदवैरुद्धयमाचरतो जनान् स्वसामर्थ्यवशान्नावरोधयेच्च। अत एव तत्रभवता श्रीमता वाचस्पतिमिश्रेणापि वेदान्तसूत्रशाङ्करभाष्यस्य 'भामती' इति नाम्ना प्रथितटीकायामयमाशयः प्रकटीकृतः प्रबलशङ्कारूपेण प्रथमत एव ब्रह्मस्वरूपविचारकाले—"भोः! भवतां ब्रह्म प्रसिद्धमप्रसिद्धं वा, यदि चेदप्रसिद्धम्, तर्हि करटक(काक)-दन्तपरीक्षणवत् तस्य परीक्षणं निरूपणं वा वृथा। अथ प्रसिद्धम्, तर्हि प्रसिद्धत्वात् सर्वे ज्ञास्यन्त्येव किमिति लक्षणस्वरूपादिप्रतिपादनेन वृथा कालो नीयते विनाश्यते भवता" इत्यादिना।

अपि च चार्वाकादिमतोपासकैर्बहुप्रकारकैर्बहुश इत्थं प्रलप्यते प्रकाश्यते च—पृथिव्यादीनि चत्वार्येव भूतानि सन्ति, तेभ्य एव देवाकारपरिणतेभ्यः समुदितेभ्यः किण्वादिभ्यो मदशक्तिवच्चैतन्यमुपजायते, तेषु विनष्टेषु (अर्थात् पृथग्भूतेषु) सत्सु तच्चैतन्यं स्वत एव विनश्यति। अत

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एव प्रामाणिकमिदं वचो यत् "विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति। न प्रेत्य संज्ञाऽस्ति" इति। अतो देहातिरिक्त आत्मनि प्रमाणाभावाच्चैतन्यविशिष्टो देह एवात्मा। यतो हि केवलमेकं प्रत्यक्षप्रमाणमेवास्ति लोके युक्तियुक्तम्। तच्च ब्रह्मणि नास्त्येवेति सर्वजन-प्रसिद्धम्। नो चेत् सर्वदा सर्वैरपि ब्रह्म गृह्येत, ब्रह्मास्ति नास्तीति विवादश्च मूलतो विच्छिद्येत। एवं चैकस्यैव प्रत्यक्षप्रमाणस्याङ्गीकारेण सर्वेष्टसिद्धौ सत्यामनुमानादेस्तु कथैव नोदेतीति।

एतावदेव न, अपि तु तैश्चार्वाकादिमार्गानुयायिभिर्निम्नप्रकारेण स्वविषयोपोद्बलकानि स्वाभिप्रायप्रतिपादकानि ह्यनेकानि पद्यान्यपि विनिर्मितानि। तानि च प्रदर्शितानि सर्वदर्शन-संग्रहे। तथाहि—

अत्र चत्वारि भूतानि भूमिवार्यनलानिलाः।
चतुर्भ्यः खलु भूतेभ्यश्चैतन्यमुपजायते॥
किण्वादिभ्यः समेतेभ्यो द्रव्येभ्यो मदशक्तिवत्।
अहं स्थूलः कृशोऽस्मीति सामानाधिकरण्यतः॥
देहस्थौल्यादियोगाच्च स एवात्मा न चापरः।
मम देहोऽयमित्युक्तिः संभवेदौपचारिकी॥

अपि च ते चार्वाकादय इत्यपि तत्रैव ब्रुवन्ति यद् बृहस्पतिनापि समभाणि—

न स्वर्गो नापवर्गो वा नैवात्मा पारलौकिकः।
नैव वर्णाश्रमादीनां क्रियाश्च फलदायिकाः॥
अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम्।
बुद्धिपौरुषहीनानां जीविका धातृनिर्मिता॥
पशुश्चेन्निहतः स्वर्गं ज्योतिष्टोमे गमिष्यति।
स्वपिता यजमानेन तत्र कस्मान्न हिंस्यते॥
मृतानामपि जन्तूनां श्राद्धं चेत् तृप्तिकारणम्।
गच्छतामिह जन्तूनां व्यर्थं पाथेयकल्पनम्॥
स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः।
प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते॥ इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किञ्च, तेषां चार्वाकादीनां वचनं प्रसिद्धं जगतीतले यत्—

यावज्जीवेत् सुखं जीवेद् ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ॥

यदि गच्छेत् परं लोकं देहादेव विनिर्गतः ।
कस्माद् भूयो न चायाति बन्धुस्नेहसमाकुलः ॥

ततश्च जीवनोपायो ब्राह्मणैर्विहितस्त्विह ।
मृतानां प्रेतकार्याणि न त्वन्यद् विद्यते क्वचित् ॥

त्रयो वेदस्य कर्तारो भण्डधूर्तनिशाचराः ।
जर्फरीतुर्फरीत्यादि पण्डितानां वचः स्मृतम् ॥ इत्यादि ।

तथा च तेषां चार्वाकादिमतमनुसरतां जनानामेतान्यपि वचांसि सन्ति यद् दुःखस्यावर्जनीयतयाऽर्थादनिवार्यतया लोके सुखेन सार्धं तद् दुःखमप्यागमिष्यत्येव । परं नीत्यादिप्रतिपादितैर्बहुभिरुपायैस्तद् दूरीकृत्य केवलं सुखमात्रमेवोपभोक्तव्यं धीमद्भिः पुरुषधौरेयैः । एतत्प्रमाणीकरणाय ते नास्तिकशिरोमणयो भगवत्पतञ्जलिप्रणीतव्याकरणमहाभाष्यस्थानि कानिचिदेतानि वाक्यान्युदाहरन्ति—"तद् यथा मत्स्यार्थी सशल्कान् सकण्टकान् मत्स्यानुपादत्ते स यावदादेयं भवति तावदादाय निवर्तते । यथा वा धान्यार्थी सपलालानि धान्यान्याहरति, स यावदादेयं भवति तावदादाय निवर्तत इति" । इत्थमेव सम्मिलितयोः सुखदुःखयोर्मध्ये सुखमादेयमस्ति, तद् ग्राह्यम्, दुःखं च त्याज्यम् । तस्माद् दुःखभयान्नानुकूलवेदनीयं सुखं त्यक्तुमुचितमिति तेषां नास्तिकमतानुवर्तिनां प्रभणनम् । किञ्चैतस्मिन् विषये ते ह्यपरमपि मुनिप्रवरश्रीमत्पतञ्जलिप्रोक्तमहाभाष्यवचनमिदमुदाहरन्ति—"नहि मृगाः सन्तीति शालयो नोप्यन्ते" । अपि च "नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते" इति ।

एतेनैतावता वाचो विग्लापनेनेदमायातं यत् तेषां पूर्वपक्षिणां धर्मशास्त्रावधीरितविरुद्धवचसां विरोधिवातावरणोदितविकारविकृतचेतोविनिवृत्तवेदवात्सल्यानामेष सिद्धान्तः संतिष्ठते यत् सांसारिकसुखमेव पुरुषार्थः, कण्टककीटककर्तनादिजन्यं दुःखमेव नरकम् । लोकप्रसिद्धो राजैव परमेश्वरः (अर्थाद् ब्रह्म) । देहोच्छेद एव मोक्षः । देहस्यात्मत्वे च प्रमाणमिदमस्ति तेषां मते यत् सर्वेऽपि जनाः सामानाधिकरण्येनेदं समालपन्ति—'कृशोऽहम्', 'कृष्णोऽहम्',

CC-0. Sampurnanand University Collection. Digitized by eGangotri

'काणोऽहम्', 'गौरोऽहम्'इत्यादि। 'मम हृदयम्' इति व्यवहारस्तु 'राहोः शिरः' इतिवदौपचारिक एवेति।

एवञ्च प्रकृतप्रस्ताव इदमागतं यन्नास्त्येव शरीराद् भिन्नः कश्चिच्चेतन आत्मा, चेतनः परमेश्वरो वा। तदभावे तु ब्रह्मणः सुतरामभावः। अत एवम्भूतस्य ब्रह्मणः स्वरूपविचार-चर्चैव का भवितुमर्हति, सा तु चर्चा दूरं गता। अतः करटकदन्तपरीक्षणवत्, भस्मनि हुतमिव तत्कथाविचारवैशद्ये वृथा कालयापनमिति पूर्वपक्षः।

चार्वाकमतखण्डनम्

इत्येवंप्रकारप्रसृतप्रकृतप्रबलपूर्वपक्षप्रविलासोल्लासोल्लसितप्रमुदितप्रतिपक्षिमनोमोदमर्दनाय सिद्धान्तपक्षमुत्तरपक्षं ब्रवीति पुरस्करोति च खलु वेदशास्त्रानुयायी विशुद्धबुद्धिधर्मोपेतः श्रद्धालुः सिद्धान्ती ह्युत्सार्य पुरतः स्थितं प्रतिपक्षिपक्षं पूर्वपक्षम्। तथाहि—

अये पूर्वपक्षिणः ! किञ्चिदेतद् विचारयन्तु, यद्धि भवद्भिरुक्तं यद् नास्ति कश्चिच्चेतनः, पृथिव्यादिभूतान्येव चत्वारि ह्यचेतनानि यदा परस्परं संघ्नन्ति (मिलितानि संयुक्तानि भवन्ति), तदा मदशक्तिवच्चेतनताऽपि समुत्पद्यत इत्यादि।

तत्र मयका सप्रश्रयमिदं विनिवेद्यते यत् तत्रभवता पतञ्जलिनाऽष्टाध्यायीप्रथमाध्याय-महाभाष्ये प्रादर्शि यद् यस्य समुदायस्यावयवो ह्यर्थवान् स समुदायोऽप्यर्थवान् भवति, यथैकं तिलं तैलदाने समर्थमिति तत्समुदायः खारीशतमप्यर्थवान् (तैलदाने समर्थः) भवति। यस्य चावयवोऽनर्थकः, तत्समुदायोऽप्यनर्थकः। यथैको वालुकाकणस्तैलदानेऽसमर्थ इति तत्समु-दायः खारीशतमप्यनर्थक इति। यद्यप्यत्र भाष्येऽन्यदपि किञ्चिदुक्तं परमेतेन प्रवृद्धकेन प्रकृत इदमायातं यद् यथा ह्येको वालुकाकणरूपावयवस्तैलदानेऽसमर्थः, एवञ्च तत्समुदायोऽप्य-समर्थ एव तैलदाने; तथैव पृथिव्यादिभूतचतुष्टयरूपसमुदायेऽपि चेतनता न भवितुमर्हति। यतो हि यदैकस्मिन् पृथिव्यादिरूपेऽवयवे चेतनता नास्त्येव, तदा तन्निर्मितसमुदायरूपे भूतचतु-ष्टयेऽपि चेतनता कुत आगच्छेत्। अतः पूर्वपक्षिणामेतत् कथनं सर्वथाप्यसङ्गतं जातं यत् तैरुक्तम्—"नास्ति कश्चिच्छरीरादतिरिक्तश्चेतनः, पृथिव्यादिभूतान्येव यदा परस्परं संमिलन्ति तदा मदशक्तिवत् तत्समुदाये चेतनता समुत्पद्यते" इति।

अत एव भगवता शङ्कराचार्येणापि वेदान्तदर्शनद्वितीयाध्यायद्वितीयपादस्याष्टादशे "समुदाय उभयहेतुकेऽपि तदप्राप्तिः" इति सूत्रे वैनाशिक(बौद्ध)मतखण्डनावसरे ह्युक्तं यत्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

परेषामभिप्रेतोऽणुहेतुकश्च भूतभौतिकसंहतिरूपः स्कन्धहेतुकश्च पञ्चस्कन्धीरूपः समुदायो नोत्पत्स्यते, समुदायिनामचेतनत्वात् , अन्यस्य च कस्यचिच्चेतनस्य भोक्तुः प्रशासितुर्वा स्थिरस्य संहन्तुरनभ्युपगमात् , निरपेक्षप्रवृत्त्यभ्युपगमे च प्रवृत्त्यनुपरमप्रसङ्गात्" इत्यादि।

एवञ्च शरीराद् भिन्नस्य कस्यचिच्चेतनस्यास्वीकारे समुदाय एव भूतचतुष्टयस्य न भवितुमर्हति पूर्वपक्षिणामभिमतः, समुदायाभावे च सर्वोऽपि तेषां सिद्धान्तो भग्नः।

एतेन तेऽपि वादिनो निरसनीयाः, ये च कथयन्ति यद् दधिगोमयोत्पन्नवृश्चिकवच्चेतना समुत्पद्यत इति। तेषामेषोऽभिप्रायो यद् दध्न्यपि वृश्चिको नास्ति, महिषगोमयेऽपि च नास्ति। परमुभयसम्मेलने सति यथा वृश्चिकः समुत्पद्यते, तथा पृथिव्यादिषु सत्यामप्यचेतनतायां तेषां भूतानां समवाये चेतना समुत्पद्यत इति। परमेतत्त्वनभिज्ञबालजनचित्तविमोहनार्थं धूलिप्रक्षेपणमात्रमेव, अथवेदं कथयतु यद् बालविभीषिकामात्रमेतत्। यतो हि तत्र दध्नि गोमये च ये क्षुद्राः कीटाणवः, त एवोभयोः सम्मेलने संयोजने च सति महाकाराः सन्तो वृश्चिका इति व्यपदिश्यन्ते। अन्यथा भवन्मतानुसारेण यद् वस्तु यत्र लेशतोऽपि नास्ति, ततोऽपि तदुत्पद्यत इत्यङ्गीकृतं चेत् तदा कुतश्चिदपि तदुत्पद्येत, किमर्थस्तत्र कारणनियमः क्रियते यत् तादृशविशेषणविशिष्टं दधिगोमयमेव स्यादिति। कुतो न पाषाणादप्युत्पद्येत वृश्चिकः? अत एव पुराणेन चिरन्तनेन "ऋषिं प्रसूतम्" इत्यादिश्रुत्यनुमोदितसृष्ट्यादिप्रसूतिना श्रीकपिलमुनिना स्वसांख्यशास्त्रे महतैव प्रयत्नेन स्वकीयः सत्कार्यवादसिद्धान्तः संस्थापितः।

एवञ्च जले निमग्नस्य तृणसाहाय्यमिव वृश्चिकदृष्टान्तदानमपि पूर्वपक्षिणो न तु योगक्षेमकरमस्ति, न च कल्याणायैव कल्पते। अतोऽकामेनापि तेन तत्रभवता पूर्वपक्षिणा संसारकार्यनिर्वाहार्थं मुक्तिसुखप्राप्त्यर्थं च शरीरात् पृथक् चेतन ईश्वरः (ब्रह्म) च स्वीकार्य एवेति।

आत्मसिद्धिः

अत एव सिद्धान्तबिन्दौ त्वंपदार्थचिन्तनवेलायामर्थादात्मपदार्थचिन्तनवेलायाम् "चक्षुरादीनि प्रत्येकमित्यपरे, मिलितानीत्यन्ये, मन इत्येके, प्राण इत्यपरे, क्षणिकं विज्ञानमिति सुगताः, शून्यमिति माध्यमिकाः, देहेन्द्रियातिरिक्तो देहपरिमाण इति दिगम्बराः (अर्थाज्जैनाः), कर्ता भोक्ता जडो विभुरिति तार्किकवैशेषिकप्राभाकराः, जडो बोधात्मक इति भाट्टाः, भोक्तैव केवलबोधात्मक इति सांख्याः पतञ्जलिश्च, अविद्यया कर्तृत्वादिभाक् परमार्थतो निर्धर्मकः परमानन्द-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बोधरूप एवेत्यौपनिषदाः" इत्येवंप्रकारेण शङ्कास्वनेकासु समुत्पन्नास्वहंप्रत्ययालम्बनविशेषस्यार्थादात्मविशेषस्य निर्णयाय तत्रभवान् भगवान् शङ्कराचार्यः समुदीरयति—

न भूमिर्न तोयं न तेजो न वायु-
र्न खं नेन्द्रियं वा न तेषां समूहः।
अनैकान्तिकत्वात् सुषुप्त्येकसिद्ध-
स्तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ १ ॥
न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि।
अनात्माश्रयाहं ममाध्यासहानात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ २ ॥
न माता पिता वा न देवा न लोका
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति।
सुषुप्तौ निरस्तातिशून्यात्मकत्वात्
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥ ३ ॥ इति।

न्यायदर्शने गौतम(गोतम)मुनिनापि तृतीयाध्यायप्रथमाह्निकस्य तृतीयेन "तद्व्यवस्थानादेवात्मसद्भावादप्रतिषेधः" इति सूत्रेण जीवात्मसद्भावः प्रतिपादितः। अस्यैषोऽभिप्रायो यद् यद्येकमेवेन्द्रियमपरेन्द्रियस्य विषयं गृह्णीयात्, ततो न भवेदात्मन आवश्यकता, परमेतन्नास्ति। अत आत्मा स्वीकार्यः, यतो हि भवत्यनुभवो यदहं पश्यामि स्पृशामि चेति।

अपि च न्यायदर्शनतृतीयाध्यायप्रथमाह्निकस्य चतुर्दशे "तदात्मगुणसद्भावादप्रतिषेधः" इत्यस्मिन् सूत्रे स्मृतेरात्मगुणत्वप्रतिपादनेन चात्मसद्भावः प्रदर्शितः।

किञ्च, वैशेषिकदर्शनेऽपि "इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः" (३।१।२) इत्यादिसूत्रैरात्मसद्भावः प्रतिपादितः। अर्थात् तत्रैष आशयो यत् 'इदमिन्द्रियम्' इति ज्ञानं यस्य स ततोऽन्यः, स एवात्मेति।

अपि च न्यायदर्शने "पूर्वाभ्यस्तस्मृत्यनुबन्धाद् जातस्य हर्षभयशोकसंप्रतिपत्तेः" (३।१।१९), "प्रेत्याहाराभ्यासकृतात् स्तन्याभिलाषात्" (३।१।२२) इति सूत्राभ्यां तस्यात्मनो नित्यत्वमपि प्रतिपादितम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मस्वरूपविमर्शः

एवञ्च निराकृते पूर्वपक्षे, सुस्थापिते च नित्य आत्मनि प्रबलैरमोघशक्तिरूपैः 'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'सोऽहम्' 'प्रज्ञानं ब्रह्म' 'अयमस्मि' इत्यादिमहावाक्यैस्तस्यैव पूर्वोक्तस्यात्मनो ब्रह्मतोऽभेदः प्रतिपाद्यतेऽद्वैतवेदान्तिभिः ।

चरकसंहितायाम्

तथा चास्य निबन्धस्य प्रधानभूतस्य "ब्रह्मस्वरूपविमर्शः" इति विषयस्य विचारश्चर्च्यते सम्प्रति । तथाहि—मान्या ब्रह्मविद्याविशारदा विद्वांसः ! इदमित्यपि समुचितमेव प्रतिभाति, यद् विशेषत औपनिषदशाङ्करब्रह्मस्वरूपप्रदर्शनपरेऽस्मिन् निबन्धेऽन्यग्रन्थप्रतिपादित-ब्रह्मस्वरूपमपि संकेततो दर्शनीयमेव, नो चेदेकदेशिता संपद्येत निबन्धस्य । अतः शाङ्करमता-दन्यमतेनापि पूर्वं प्रदर्श्यते ब्रह्मस्वरूपम् । तथाहि—चरकसंहितायां शारीरस्थाने पञ्चमाध्याये प्रोक्तम्—"पुरुषोऽयं लोकसम्मित इत्युवाच भगवान् पुनर्वसुरात्रेयः, यावन्तो हि लोके मूर्तिमन्तो भावविशेषास्तावन्तः पुरुषे, यावन्तः पुरुषे, तावन्तो लोक इति ।", ततोऽग्रेऽप्युक्तम्—"षड् धातवः समुदिताः 'लोक' इति शब्दं लभन्ते । तद्यथा—पृथि[1]व्या[2]पस्तेजो[3] वा[4]युराका[5]शं ब्रह्म[6] चाव्यक्तमिति । एत एव षड् धातवः समुदिताः पुरुष इति शब्दं लभन्ते । तस्य पुरुषस्य पृथिवी मूर्तिः, आपः क्लेदः, तेजोऽभिसन्तापः, वायुः प्राणः, वियच्छिद्राणि, ब्रह्म अन्तरात्मा" इत्यादि ।

एतेनेदमायातं यच्चरकसंहिताप्रतिसंस्कर्ता पतञ्जलिः, अन्यो वा कश्चिदन्तरात्म-स्वरूपमेव ब्रह्म स्वीकरोति, तयोरभेदात् । अयमेव सिद्धान्त उपनिषदि वैश्वानरविद्याप्रति-पादनवेलायां प्रतिपादितः ।

वेदेषु

अपि च यजुर्वेदे—"ब्रह्म क्षत्रं पवते तेजः" इत्येकोनविंशाध्याये, "ब्रह्मजज्ञानं प्रथमम्" इति त्रयोदशाध्याये, "ब्रह्मणस्पते त्वमस्य यन्ता" इत्यादिचतुस्त्रिंशाध्याये, "ब्रह्मणो ब्राह्मणं क्षत्राय" इत्यादि त्रिंशाध्याये, "ब्रह्माणि मे मतयः" इत्यादि त्रयस्त्रिंशाध्याये—इत्येवंप्रकारेण चान्यत्रापि बहुशो ब्रह्मशब्दः समागतः, परं तत्र ब्राह्मणाद्यर्थेषु सत्स्वपि ब्रह्मरूपार्थो बाहुल्येन न गृहीतः । अतस्ते मन्त्रा अत्र नोदाह्रियन्ते, परं तथापि त्रयोविंशाध्यायेऽष्टचत्वारिंशत्तमे मन्त्रे ब्रह्मशब्दो ब्रह्मरूपार्थ एव वर्णितः । तत्र हि पूर्वं प्रश्नरूपेण कथितं यत्—

> किं स्वित् सूर्यसमं ज्योतिः किं समुद्रसमं सरः ।
> किं स्वित् पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते ॥ (यजु० २३।४७)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तदनन्तरं च—

ब्रह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमं सरः ।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यतो ॥ (यजु० २३।४८)

इत्येवंप्रकारेणोत्तरं प्रदत्तम् । अतो ज्ञायते यद् भगवता वेदेन ब्रह्मणः सूर्यसमत्वमर्थात् स्वयंप्रकाशत्वं प्रद्योतितम् । तदेव चोपनिषद्यपि प्रोक्तम्—"तस्य भासा सर्वमिदं विभाति" इति ।

अपि च तत्रैव वेदे—"तस्माद् यज्ञात् सर्वहुत ऋचःसामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥" (यजु० ३१।७), "यज्ञो वै विष्णुः" (शत० का० १ अ० १ ब्रा० २ क० १३) इत्येताभ्यां मन्त्राभ्यां ब्रह्मणो वेदयोनित्वेन सर्वज्ञस्वरूपत्वं प्रतिपादितम् । एवमेव भगवता व्यासेनापि वेदान्तदर्शने प्रथमाध्याये "शास्त्रयोनित्वात्" इति सूत्रेण ब्रह्मणः सर्वज्ञस्वरूपत्वं प्रकाशितम् । तथा च "खं ब्रह्म" इति यजुर्मन्त्रेणापि खस्वरूपत्वं प्रत्यपादि ।

एवञ्चाथर्ववेदसंहितायां प्राभाणि यत्—

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति ।
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥ इति । (अथर्व० १०।८।१)

अपि च—

यस्य भूमिः प्रमाऽन्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥ (अथर्व० १०।७।३२)

तथा च—

यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः ॥ (अथर्व० १०।७।३३)

इत्यादिमन्त्रैर्ब्रह्मणो ब्रह्माण्डस्वरूपत्वं प्रतिपादितम् । यथा चोपनिषदि वैश्वानरविद्यायां प्रोक्तम् । किञ्च, ऋग्वेदेऽपि चोक्तम्—"सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्" (ऋ० १० । १९० । ३) इति । एतेनेदमायाति यद् धातुरर्थाद् ब्रह्मणः सृष्टिकर्तृत्वस्वरूपत्वमस्ति । यजुर्वेदे तु विस्तरतश्चः सुस्पष्टतया च ब्रह्मस्वरूपं न्यगादि । तथाहि—

स पर्यगाच्छुक्रमकायमव्रणम् अस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ इति ।
(यजु० ४०।८)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मस्वरूपविमर्शः

अनेन मन्त्रेण ब्रह्मणः शरीररहितत्वं निराकारत्वं निर्विकारत्वं सर्वव्यापकत्वं शुद्धत्वं दुःख-रहितत्वं सृष्टिकर्तृत्वं च स्वरूपं व्याख्यातम् ।

उपनिषत्सु

अपि च कठवल्ल्यामुक्तम्—

अणोरणीयान् महतो महीयान् आत्माऽस्य जन्तोर्निहितो गुहायाम् ।
तमक्रतुः पश्यति वीतशोको धातुः प्रसादाद् महिमानमात्मनः ॥ इति ।
(कठ० २ म० २०)

किञ्च, ततोऽग्रे तत्रैवोक्तम्—

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते ॥ इति ।
(कठ० ३ म० १५)

ततश्चाभाणि तत्रैव—

यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ (कठ ४ म० १०)

अपि च—

एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
(कठ० ५, म० १२)

किञ्च—

नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां शान्तिः शाश्वती नेतरेषाम् ॥
(कठ० ५, म० १३)

अपि च—

दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रोऽक्षरात् परतः परः ॥ (मु० २।१।२)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

किञ्च, माण्डूक्योपनिषदि समुदाहृतम्—

"नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञमदृष्टमव्यवहार्यम-ग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः।" (माण्डूक्य० म० ७) इति।

किञ्च, तैत्तिरीयोपनिषदि प्रत्यपादि—

सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्।
सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति॥
(तै० ब्रह्मानन्दवल्ली २ म० १)

अपि च छान्दोग्योपनिषदि चाभाणि—

"यो वै भूमा तत् सुखं, नाल्पे सुखमस्ति, भूमैव सुखम्, भूमा त्वेव विजिज्ञासितव्यः" (छा० अध्या० ७ ख० २३ म० १) इति। "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानाति स भूमा। अथ यत्रान्यत् पश्यत्यन्यच्छृणोत्यन्यद् विजानाति तदल्पम्। यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यम्। स भगवः कस्मिन् प्रतिष्ठित इति, स्वे महिम्नि। यदि वा न महिम्नीति।" (छा० अध्या० ७ ख० २३ म० २)। किञ्च, "सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत···" (छा० अध्या० ३ ख० १४ म० १) इत्यादिमन्त्रैर्ब्रह्मणः स्वरूपं सुसम्यक्तया प्रकाशितम्। एतादृशमेव ब्रह्मस्वरूपं तत्रभवता शङ्कराचार्येणापि स्वभाष्ये स्वीकृतम्।

अपि च सिद्धान्तलेशसंग्रहेऽपि "यतो वा इमानि भूतानि जायन्ते" इत्यादिश्रुत्या जगज्जन्मस्थितिलयकारणस्वरूपत्वं ब्रह्मणः प्रोक्तम्। जगदुत्पत्तिकारणत्वम्, जगत्स्थितिकारणत्वम्, जगल्लयकारणत्वमिति लक्षणत्रयमिदमस्ति। अत एव "अत्ता चराचरग्रहणात्" (वे० द० अ० १ पा० २ सू० ९) इति वेदान्तसूत्रे सर्वसंहर्तृत्वमित्येकमेव लक्षणं ब्रह्मलिङ्गतया समुपन्यस्तमिति।

केनोपनिषद्यपि ब्रह्मणः स्वरूपं भूयसा प्राचुर्येण प्रादर्शि। तथाहि—

यद् वाचानभ्युदितं येन वागभ्युद्यते।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यन्मनसा न मनुते येनाहुर्मनो मतम्।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥
यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मस्वरूपविमर्शः

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥
यत् प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ (के० १।४-८)

बृहदारण्यकोपनिषदि बहुधा ब्रह्मशब्दः समागतः । तथाहि प्रथमाध्यायस्य—

चतुर्थब्राह्मणे—तद् ब्रह्म, ब्रह्मास्मि, ब्रह्म वा इदमग्र आसीत्, तदेतद् ब्रह्म ।

पञ्चमब्राह्मणे—अहं ब्रह्म, सर्वस्य ब्रह्म ।

षष्ठब्राह्मणे—ब्रह्मैतत् ।

द्वितीयाध्यायस्य—

प्रथमब्राह्मणे—ब्रह्म ते ब्रवाणि, अहं ब्रह्मोपासे, ब्रह्म मे वक्ष्यतीति ।

द्वितीयब्राह्मणे—ब्रह्मणा संविदाना ।

तृतीयब्राह्मणे—द्वे वाव ब्रह्मणो रूपे ।

चतुर्थब्राह्मणे—ब्रह्मणः कामाय ब्रह्म प्रियं भवति, ब्रह्म तं परादाद्यः, इदं ब्रह्मेदं क्षत्रम् । अत्र ब्रह्मशब्दो ब्राह्मणादिपरः, न त्वीश्वरवाचकः ।

पञ्चमब्राह्मणे—ब्रह्मेदं सर्वम्, तदेतद् ब्रह्म ।

षष्ठब्राह्मणे—ब्रह्मणो ब्रह्म स्वयम्भुब्रह्मणे नमः ।

तृतीयाध्यायस्य—

प्रथमब्रा०—ब्रह्मणर्त्विजा मनसा चन्द्रेण मनो वै यज्ञस्य ब्रह्मा ।

चतुर्थब्रा०—साक्षादपरोक्षाद् ब्रह्म ।

पञ्चमब्रा०—साक्षादपरोक्षाद् ब्रह्म ।

षष्ठब्रा०—ब्रह्मलोकेषु । अत्र ब्रह्मशब्दो लोकवाचकः, न त्वीश्वरवाचकः ।

अष्टमब्रा०—कश्चिद् ब्रह्मोद्यं जेता ।

चतुर्थाध्यायस्य—

प्र० ब्रा०—वाग् वै ब्रह्म, परमं ब्रह्म, प्राणो वै ब्रह्म, श्रोत्रं वै ब्रह्म, मनो वै ब्रह्म, हृदयं वै ब्रह्म ।

तृ० ब्रा०—ब्रह्मलोके । अत्र ब्रह्मशब्दो लोकपरः, न त्वीश्वरवाचकः । इदं ब्रह्म ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

चतुर्थब्रा०—अयमात्मा ब्रह्म, ब्रह्मैव सन् ब्रह्माप्येति, एष पन्था ब्रह्मणा, ब्रह्मवित्, पुण्यकृत्, ब्रह्मामृतोऽमृतम्, ब्रह्म पुराणम्, ब्रह्माभयम्।

पञ्चमब्रा०—ब्रह्मवादिनी, ब्रह्मणः कामाय ब्रह्म प्रियम्, ब्रह्म तं परादाद्यः, इदं ब्रह्मेदं क्षत्रम्। अत्र ब्रह्मशब्दो ब्राह्मणपरो न त्वीश्वरवाचकः।

षष्ठब्रा०—ब्रह्मणो ब्रह्म स्वयम्भुर्ब्रह्मणे नमः।

पञ्चमाध्यायस्य—

तृ०ब्रा०—एतद् ब्रह्म।

च०ब्रा०—सत्यं ब्रह्म, सत्यं ह्येव ब्रह्म।

पञ्चमब्रा०—सत्यं ब्रह्म, ब्रह्म प्रजापतिम्।

सप्तमब्रा०—विद्युद् ब्रह्म, विद्युद्ध्येव ब्रह्म।

द्वादशब्रा०—अन्नं ब्रह्म, प्राणो ब्रह्म।

षष्ठाध्यायस्य—

तृ०ब्रा०—ब्रह्मणे स्वाहा।

पञ्चमब्रा०—ब्रह्मणो ब्रह्म स्वयम्भुर्ब्रह्मणे नमः।

द्वितीयाध्यायचतुर्थब्राह्मणस्थं तथा चतुर्थाध्यायपञ्चमब्राह्मणस्थम् "इदं ब्रह्मेदं क्षत्रम्" इति स्थितम्। अपि च तृतीयाध्यायषष्ठब्राह्मणस्थं तथा चतुर्थाध्यायतृतीयब्राह्मणस्थम् "ब्रह्मलोके" इति स्थितं च ब्रह्मशब्दं विहाय पूर्वोक्तप्रकारेण सर्वत्र मन्त्रेषु समागतो ब्रह्मशब्दः पूर्ववन्नित्यशुद्ध-बुद्धमुक्तस्वभावसर्वज्ञसर्वेश्वरादिवाचक इति बृहदारण्यकोपनिषत्सम्बन्धिब्रह्मशब्दविमर्शो विज्ञातव्यः।

श्वेताश्वतरोपनिषद्यपि सम्यक् संस्थितो ब्रह्मशब्दः। तथाहि—

प्रथमाध्याये—ब्रह्मवादिनो वदन्ति, किं कारणं ब्रह्म ब्रह्म चक्रे, ब्रह्मविदो विदित्वा, त्रिविधं ब्रह्ममेतत्, तद् ब्रह्म।

द्वितीयाध्याये—युजे वां ब्रह्म पूर्व्यम्, जुषेत ब्रह्म पूर्व्यम्, ब्रह्मोडुपेन।

तृतीयाध्याये—ततः परं ब्रह्म।

चतुर्थाध्याये—तदेव शुक्रं तद् ब्रह्म।

पञ्चमाध्याये—द्वे अक्षरे ब्रह्मपरे, ब्रह्मयोनिम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ब्रह्मस्वरूपविमर्शः

षष्ठाध्याये—ब्रह्माव्ययम्, यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै।
अत्र ब्रह्मशब्दश्चतुर्मुखब्रह्मपरः, न त्वीश्वरवाचकः। ब्रह्म ह श्वेताश्वतरोऽथ विद्वान्।

अत्र षष्ठाध्यायस्य "यो ब्रह्माणं विदधाति" इत्येद् ब्रह्मपदं विहाय सर्वत्र समागतो ब्रह्मशब्दः पूर्वनित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञसर्वेश्वरादिवाचक इति श्वेताश्वतरोपनिषत्सम्बन्धिब्रह्मशब्दविमर्शो विभावनीयः।

दर्शनेषु

इदानीं दर्शनस्थब्रह्मशब्दविचारश्चर्च्यते—

१. सांख्यदर्शने—

"आब्रह्मस्तम्बपर्यन्तं तत्कृते सृष्टिरविवेकात्" (३ अ० ४७ सू०) अत्र सूत्रे ब्रह्मशब्दो न वेदान्तादिविज्ञापितब्रह्मपरः, अपि तु चतुर्मुखो यो ब्रह्मा तत्पर इति विज्ञानभिक्षुणा तत्रैव स्वभाष्ये व्यलेखि।

"समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता" (५ अ० ११६ सू०) अत्र 'ब्रह्मरूपता' इत्यस्य भावार्थं विज्ञानभिक्षुस्तत्रैव स्वभाष्ये लिखति—"बुद्धिवृत्तिविलयस्तदौपाधिकपरिच्छेदविगमेन स्वस्वरूपपूर्णतयाऽवस्थानम्, यथा घटध्वंसे घटाकाशस्य पूर्णतेत्यर्थः" इति। अग्रे चास्यैव सूत्रस्य भाष्ये सुस्पष्टतया निगदति—"असच्छास्त्रे च ब्रह्मशब्द औपाधिकपरिच्छेदमालिन्यादिरहितपरिपूर्णचेतनसामान्यवाची, न तु ब्रह्ममीमांसायामिवैश्वर्योपलक्षितपुरुषमात्रवाचीति विवेक्तव्यम्। अत्रैते श्लोकाः शिष्यव्युत्पत्त्यर्थमुच्यन्ते—

चिदाकाशेऽनभिव्यक्ते नानाकारैरितस्ततः।
धीरटन्ती सह व्यक्त्या चिदटन्तीं प्रदर्शयेत्॥
वस्तुतस्तु सदा पूर्णमेकरूपं च चिन्नभः।
वृत्तिशून्यप्रदेशेषु दृश्यभावान्न पश्यति॥
चक्षुषा रूपवत् पुंसो दृश्या वृत्तिर्हि नेतरत्।
समाध्यादौ च सा नास्तीत्यतः पूर्णः पुमांस्तदा॥

इत्येवंप्रकारेण सांख्यदर्शनीयब्रह्मशब्दविमर्शो विज्ञेयः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

२. योगदर्शने—

प्रथमपादे षोडशसूत्रे पुरुषशब्दः, त्रयोविंशतितमे चतुर्विंशतितमे चेश्वरशब्दः, पञ्चविंशतितमे सर्वज्ञशब्दः, एकोनत्रिंशत्तमे चेतनशब्दः, सप्तचत्वारिंशत्तमे चात्मशब्दः। द्वितीयपादे द्वात्रिंशत्तमे पञ्चचत्वारिंशत्तमे चेश्वरशब्दः। तृतीयपादे पञ्चत्रिंशत्तमे पञ्चपञ्चाशत्तमे च पुरुषशब्दः। चतुर्थपादे चाष्टादशे प्रभुशब्दः पुरुषशब्दश्च, त्रयोविंशतितमे च द्रष्टृशब्दः, चतुस्त्रिंशत्तमे च चितिशक्तिशब्दः समायातः। परं ब्रह्मशब्दः सर्वस्मिन् दर्शने क्वापि नायातः।

३. न्यायदर्शने—

यद्यपीश्वरशब्दः समायातः, परं सर्वस्मिन् दर्शने पञ्चस्वप्यध्यायेषु क्वापि ब्रह्मशब्दो नागतः।

४. वैशेषिकदर्शने

यद्यप्यात्मादयः शब्दाः समागताः, परं सर्वस्मिन् दर्शने दशस्वप्यध्यायेषु क्वापि ब्रह्मशब्दो नागतः।

५. मीमांसादर्शने—

"धेनुवच्चाश्वदक्षिणा, स ब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य" (अ० १० पा० ३ सू० ६५)।

"ब्रह्मदानेऽविशिष्टमिति चेत्" (अ० १० पा० ३ सू० ७०)।

"यदि तु ब्रह्मणस्तदूनं तद्विकारः स्यात्" (अ० १० पा० ३ सू० ७१)।

"अब्राह्मणे च दर्शनात्" (अ० १० पा० ७ सू० ८)।

अत्र सूत्रे ब्राह्मणशब्दो न तु ब्रह्मशब्दोऽस्ति।

"पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत् तस्माद् ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात्" (अ० ११ पा० २ सू. ४९)।

अत्र सूत्रे 'ब्रह्मसाम' इति कर्मनामधेयम्।

"ब्रह्मापीति चेत्" (अ० १२ पा० १ सू० ३६)।

इत्येतेषु सूत्रेषु ब्रह्मशब्दः समागतः, परम् "अब्राह्मणे च दर्शनात्" इति, तथा "पर्यग्निकृतेत्यादि" इति च सूत्रद्वयं विहायान्येषु सर्वेषु ब्रह्मशब्दो यज्ञसम्बन्धी यो ब्रह्मा तत्परः,

CC-0. Sampurnanand University Collection. Digitized by eGangotri

न त्वीश्वरवाचकः । युक्तमपि प्रतिभाति, यतो हि कर्मकाण्डवर्णनं तत्र सूत्रेषु । इति मीमांसादर्शनस्थब्रह्मशब्दविमर्शः ।

६. वेदान्तदर्शने—

"अथातो ब्रह्मजिज्ञासा (वे. द. अ० १ पा० १ सू०) ।

"स्याच्चैकस्य ब्रह्मशब्दवत्" (वे. द. २ अ० ३ पा० ५ सू०) ।

"ब्रह्मदृष्टिरुत्कर्षात्" (वे. द. ४ अ० १ पा० ५ सू०) ।

"ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" (वे. द. ४ अ० ४ पा० ५ सू०) ।

इत्येतेषु सूत्रेषु ब्रह्मशब्दः समागतः । अयं ब्रह्मशब्दः सत्यकामसत्यसंकल्पनित्यशुद्धबुद्धमुक्तस्वभावसृष्टिकर्तृसर्वज्ञसर्वेश्वरादिवाचकः । इति वेदान्तदर्शनस्थब्रह्मशब्दविमर्शः ।

मनुस्मृतौ

मनुस्मृतावपि ब्रह्मशब्दः समागतः । तथाहि—

तद् वै युगसहस्रान्तं ब्राह्मं पुण्यमहर्विदुः ।
रात्रिं च तावतीमेव तेऽहोरात्रविदो जनाः ॥ (१ । ७३)
तस्य सोऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते ।
प्रतिबुद्धश्च सृजति मनः सदसदात्मकम् ॥ (१ । ७४)
मनः सृष्टिं विकुरुते चोद्यमानं सिसृक्षया ।
आकाशं जायते तस्मात् तस्य शब्दं गुणं विदुः ॥ (१ । ७५)

आकाशात्तु विकुर्वाणात् सर्वगन्धवहः शुचिः ।
बलवान् जायते वायुः स वै स्पर्शगुणो मतः ॥ (१ । ७६)

अत्र मनुस्मृतौ पूर्वश्लोके 'ब्राह्मम्' इत्यत्र समागतेन ब्रह्मशब्देन ग्रन्थकारो ब्रह्माणं दर्शयति, न तु ब्रह्मेति विज्ञातव्यम् । किञ्च—

सम्यग्दर्शनसंपन्नः कर्मभिर्न विबद्ध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥ (६ । ७४)

अत्र श्लोके 'सम्यग्दर्शनसंपन्नः' इत्यस्य 'ब्रह्मसाक्षात्कारवान्' इत्यर्थः । परं तस्य ब्रह्मणः स्वरूपं कीदृगिति विचारो न प्रकटितः । अपि च—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात् तं पुरुषं परम् ॥ (१२ । १२२)

एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ॥ (१२ । १२३)

एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ॥ (१२ । १२४)

एवं यः सर्वभूतेषु पश्यत्यात्मानमात्मना ।
स सर्वसमतामेत्य ब्रह्माभ्येति परं पदम् ॥ (१२ । १२५)

एषु श्लोकेषु मनुर्ब्रह्मणः स्वरूपं प्रदर्शितवान् । अपि चात्रैतदपि रहस्यं यन्मनुः सर्वव्यापकं सृष्टिकर्तारमीश्वरमेव ब्रह्मशब्देन व्यवहरति ।

वाक्यपदीये

वाक्यपदीयकारोऽपि ग्रन्थादावेव ब्रह्मशब्दं वर्णयति । तथाहि—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥ (१ । १)

उपसंहारः

इत्थम् ऋग्वेदादिभाष्यभूमिकायाम्, वैदिकसम्पत्तौ, सत्यार्थप्रकाशे, नैष्कर्म्यसिद्धौ, चतुर्वेदोपनिषदादिषु च ब्रह्मस्वरूपमस्ति वर्णितम्, तत्त्वाकर्षणमाहत्यैव संक्षेपतोऽत्रालेखि । अतोऽधुना विस्तरभियैहैव विरामो विधीयते । मान्याः सूरयः ! समधीत्य सन्निबन्धमेनं समनुकम्पयन्तु मामिति समस्ति मे विनिवेदनमित्यलमतिपल्लवितेन । अन्ते च जगन्नियन्तृ जगदीश्वरं प्रत्यस्ति मे समभ्यर्थना यत्—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अभिज्ञानशाकुन्तलसमीक्षा

श्रीमहादेव उपाध्यायः, वा०सं०वि०वि० साहित्याध्यापकः ।

(पूर्वाङ्कतोऽनुवृत्तिः)

अर्थप्रकृतिविमर्शः

नाटकेऽर्थप्रकृतयः (नाटकीयप्रयोजनसिद्धिहेतवः) पञ्च यथास्थानं योज्या इत्यपि नाटकविदां सम्मतम् । तदुक्तं दर्पणे—

बीजं बिन्दुः पताका च प्रकरी कार्यमेव च ।
अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथविधि ॥

तत्र शाकुन्तले बीजं यथा—प्रथमेऽङ्के राजवैखानससंवादेन सूचितम् । तत्र हि वैखानसः (सहर्षम्)—'उचितमेवैतत्' इत्यादिना 'चक्रवर्तिनमाप्नुहि' इत्यन्तेन मुखनामकस्य सन्धेरुपक्षेप-रूपमङ्गं काव्यार्थस्य समुत्पत्तिरूपं सूचयता वैखानसवाक्येन प्रथमेन, द्वितीयेन च—'राजन् समिदाहरणाय प्रस्थिता वयम्' इत्यादिना 'मौर्वीकिणाङ्क' इत्यन्तेन साधिदैवत इव शकुन्त-लयेत्यनेन च शकुन्तलैव सर्वजननिग्रहानुग्रहक्षमा, नास्ति तस्या उपरि कोऽपि गुर्वतिरिक्तः प्रभुरिति दर्शयित्वा राज्ञः प्रच्छन्नविहारोऽपि सुलभ इति ध्वनयता, अनुमालिनीतीरमित्यनेन मृगयां पर्यटतो राज्ञो मालिनीशीकरशीतलवातेन श्रमापनोदो विहारयोग्यं चैतत् स्थानमित्यपि व्यञ्जयता, 'दृश्यते' इत्यनेन समीप एव तत् स्थानं गमनश्रमोऽपि नैव भवतीत्यपि गूढमुद्घाटयता, प्रतिगृह्यतामतिथिसत्कार इत्यनेन चोल्लेखनामानं नाट्यालङ्कारं ध्वनयता, तृतीयेन च वैखानस-वाक्येन—'इदानीमेव दुहितरं शकुन्तलाम्' इत्यारभ्य 'सोमतीर्थं गतः' इत्यन्तेनापरान् शिष्यादीन् विहाय शकुन्तलाया आतिथ्ये विनियोजनेन कण्वस्य जीवितसर्वस्वं शकुन्तलेति ध्वनयता, दैवमस्याः प्रतिकूलं शमयितुमित्यनेन च परिणयप्रतिबन्धकत्वरूपप्रतिकूलत्वविशिष्टदैवाभिधानेन शकुन्तलाया अनूढात्वं द्योतयता साधुबीजं समुद्दिष्टम् । तथाहि बीजलक्षणं शाकुन्तले—

अल्पमात्रं समुद्दिष्टं बहुधा यद् विसर्पति ।
फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इदं तु फलबीजमित्यवगन्तव्यम् । तदुक्तं मातृगुप्ताचार्यैः—

फले यस्य हि संहारः फलबीजं तु तद्भवेत् ।
वस्तुबीजं कथा ज्ञेया अर्थबीजं तु नायकः ॥ इति ।

पूर्वम् अल्पोद्दिष्टः, पश्चाद् बहुधा विस्तारशाली कार्यफलको हेतुविशेषो बीजवद् बीजमित्युच्यते ।

बिन्दुर्यथा शाकुन्तले द्वितीयेऽङ्के—"राजा—सखे माधव्य ! अनाप्तचक्षुःफलोऽसि येन त्वया द्रष्टव्यानां परं न दृष्टमिति । अत्र मृगयाव्यापारात् परं कथाविश्रान्तेः 'अनाप्तचक्षुः-फलोऽसि' इत्यनेन पुनरवान्तरकथोत्थापने हेतुप्रदर्शनाद् बिन्दुरुपन्यस्तः । बिन्दुलक्षणं चोक्तं दर्पणे—

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् । इति ।

अयं च जले तैलबिन्दुवत् प्रसारित्वाद् बिन्दुरिति व्यपदिश्यते । शाकुन्तले पताका तु विदूषकस्य चरितम्, द्वितीयाङ्कादारभ्य षष्ठाङ्कं यावद् व्यापित्वात् । सप्तमाङ्कगतान्निर्वहण-सन्धेः प्रासङ्गिकवृत्तत्वाच्च । तदुक्तं मुनिना—

आगर्भादाविमर्शाद् वा पताका विनिवर्तते । इति ।

पताकालक्षणं तु दर्पणे—

व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते ।

पताकानायकस्य तु स्वकीयं फलान्तरं न भवति । तदुक्तं दर्पणे—

पताकानायकस्य स्यान्न स्वकीयं फलान्तरम् ।
गर्भे सन्धौ विमर्शे वा निर्वाहस्तस्य जायते ॥ इति ।

यद्यप्यभिधया वृत्त्या नायकसहायकस्य व्यापि प्रासङ्गिकं वृत्तमेव पताकेत्युच्यते, तथापि प्रासङ्गिकवृत्तत्वेन सादृश्याद् गौण्या वृत्त्या नायकफलमपि पताका । सा तु निर्वहण-सन्धिपर्यन्तमपि गच्छतीति नागर्भादा विमर्शाद्वेति मुनिवचनविरोधः । उक्तञ्च दर्पणे शाकुन्तले विदूषकचरितस्य पताकात्वम् ।

प्रकरी यथा शाकुन्तले षष्ठेऽङ्के—'ततः प्रविशति चूताङ्कुरमवलोकयन्ती चेटी अपरा च पृष्ठतस्तस्याः' इत्यादिना 'नेपथ्ये' इत्यन्तेन प्रदर्शिता । प्रकरीलक्षणं तु दर्पणे—

प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता । इति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

भावप्रकाशिकायां तु विशेषः—

शोभायै वेदिकादीनां यथा पुष्पाक्षतादयः ।
अथर्तुवर्णनादिस्तु प्रसङ्गे प्रकरी भवेत् ॥ इति ।

'कार्यम्' तु शाकुन्तले शकुन्तलाप्राप्तिरूपम् । यतो हि तदेव साध्यत्वेनापेक्षितम् । तदर्थमेव तदुपाये प्रथमप्रवृत्तिः । यत्सिद्धयै एव सामग्रीसमवधानरूपं समापनमिति । कार्य-लक्षणं तु दर्पणे—

अपेक्षितं तु यत्साध्यम् आरम्भो यन्निबन्धनः ।
समापनं तु तत्सिद्धयै तत् कार्यमिति सम्मतम् ॥ इति ।

व्याख्यातं च रामचरणतर्कवागीशेन—कार्यमाह 'अपेक्षितमिति । आकाङ्क्षितम् । न तु प्रासङ्गिकमित्यर्थः । आरम्य उपाये प्रथमप्रवृत्तिः । यन्निबन्धनः=यदृच्छाप्रयोज्यः । समापनम् =सामग्रीसमवधानम्' इति ।

कार्यावस्थापञ्चकविमर्शः

तस्य च कार्यस्य फलार्थिभिः प्रारब्धस्य पञ्चावस्था भवन्ति । आरम्भयत्नप्राप्त्याशानियताप्तिफलागमरूपा । तदुक्तं दर्पणे—

अवस्था पञ्च कार्यस्य प्रारब्धस्य फलार्थिभिः ।
आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः ॥

तत्र—

भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये ।
प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः ॥
उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः ।
अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता ॥
साऽवस्था फलयोगः स्याद् यः समग्रफलोदयः ।

तत्र शाकुन्तले आरम्भो यथा—

पृष्टा जनेन समदुःखसुखेन बाला
नेयं न वक्ष्यति मनोगतमाधिहेतुम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

दृष्टो विवृत्य बहुशोऽप्यनया सतृष्ण-
मत्रोत्तरश्रवणकातरतां गतोऽस्मि ॥

अनेन वाक्येन शकुन्तलाप्राप्तिरूपमुख्यफलसिद्धये राज्ञ औत्सुक्यं सूच्यत इत्यारम्भः ।

शकुन्तला—"यतः प्रभृति तपोवनरक्षिता स राजर्षिर्मम दर्शनपथं गतस्ततः प्रभृति तद्गतेनाभिलाषेण एतावदवस्थाऽस्मि संवृत्ता" इत्यनेन, शकुन्तला "तद्यदि—वामनुमतं ततस्तथा प्रवर्तितव्यं तथा तस्य राजर्षेरनुकम्पनीया भवामीति, अन्यथा स्मरतं माम्" इत्यनेन च शकुन्तलाया अपि राज्ञि औत्सुक्यं सूच्यत इति नायकयोरुभयोरपि परस्परमौत्सुक्यसूचना-दारम्भप्रकर्षः ।

शाकुन्तले प्रयत्नो यथा—तृतीयेऽङ्के राजानं प्रति शकुन्तलाया मदनलेखः । राज्ञोऽपि शकुन्तलां प्रत्यन्तर्हितस्यात्मनः सहसा प्रकटीकरणम् ।

शाकुन्तले प्राप्त्याशा यथा तृतीयेऽङ्के । प्रियंवदा—"आश्रमवासिनो जनस्य राज्ञा आर्तिहरेण भवितव्यमिति नन्वेष धर्मः" इति । पुनरपि प्रियंवदा—"तेन हि इयमावयोः प्रियसखी त्वामेवोद्दिश्य भगवता मदनेन इदमवस्थान्तरं प्रापिता, तदर्हसि अभ्युपपत्त्या जीवितमस्या अवलम्बयितुम्" इति वाक्याभ्यां शकुन्तलाया दुष्यन्तप्राप्त्युपायः कृतः । किन्तु तत्राऽनुसूया—"बहुवल्लभाः खलु राजानः श्रूयन्ते तद्यथेयं नौ प्रियसखी बन्धुजनशोचनीया न भवति तथा करिष्यति" इत्यनुसूयावाक्येनाऽपायशङ्कापि प्रदर्शितेतीह साध्वी प्राप्त्याशा । किञ्च, शाकुन्तले चतुर्थेऽङ्के शकुन्तलायाः पतिगृहगमनप्रसङ्गे सख्यौ—(तथा कृत्वा) "सखि ! यदि नाम स राजर्षिः प्रत्यभिज्ञानमन्थरो भवेत् तदाऽस्येदमात्मनो नामधेयाङ्कितमङ्गुरीयकं दर्शयिष्यसि" । शकुन्तला—"अनेन वां सन्देशेन कम्पितं मे हृदयम्" इति वाक्याभ्यामुपायोऽ-पायशङ्का च द्वावपि सूचितौ । इति प्राप्त्याशा ।

शाकुन्तले तृतीयेऽङ्के नियताप्तिर्यथा—अनुसूया "(बहिः सदृष्टिक्षेपम्) प्रियंवदे ! एष तपस्विमृगपोतक इतस्ततो दत्तदृष्टिर्नूनं मातरं प्रभ्रष्टामन्विष्यति । तत् संयोजयामि एनम् । प्रियंवदा—हला ! चपलः खल्वेष नैनं संयोजयितुमेकाकिनी पारयसि, तदहमपि सहायत्वं करिष्यामि" । (इत्युभे प्रस्थिते) । "शकुन्तला—हला ! इतोऽन्यतो गन्तुं न वामनुमन्ये, यतोऽसहायिनी अस्मि । उभे—(सस्मितम्) त्वं तावदसहायिनी ! यस्याः पृथिवीनाथः समीपे वर्तते" (इति निष्क्रान्ते) । अनेन वाक्यकदम्बकेन शकुन्तलादुष्यन्तयोरेकान्तसमागमेऽ-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

पायभूतयोः प्रियंवदाऽनुसूययोर्बहिर्निष्क्रमणबोधनपरेणापायाभावतो नियता एकान्तसमागमरूपफलप्राप्तिः सूच्यते ।

फलागमो यथा—शाकुन्तले सप्तमेऽङ्के दुष्यन्तस्य सापत्यदारलाभरूपः समग्रफलोदयः । अथेदं तावद् विमृश्यते यदुक्तं प्राक्—

"काव्येषु नाटकं श्रेष्ठं तत्रापि च शकुन्तला" इति ।

तत्र शकुन्तलायाः समग्रनाटकलक्षणलक्षिते सति सम्भवति नान्यथा । नाटकलक्षणं चोक्तं विश्वनाथेन—

नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासद्‌र्ध्यादिगुणवद् युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुद्भूतिर्नानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः ॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः ॥
चत्वारः पञ्च वा मुख्याः कार्यव्यापृतपूरुषाः ।
गोपुच्छाग्रसमग्रं तु बन्धनं तस्य कीर्तितम् ॥

तदिदं शाकुन्तले समीक्ष्यते—तत्र शाकुन्तलवृत्तस्य महाभारते प्रसिद्धत्वेन ख्यातवृत्तत्वमत्रास्ति । अथ पञ्चसन्धिसमन्वितत्वमत्रालोच्यते । तत्र पञ्च सन्धयः—

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः ।
इति पञ्चास्य भेदाः स्युः·········॥

तत्र मुखसन्धेर्लक्षणम्—

यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा ।
प्रारम्भेण समायुक्ता तन्मुखं परिकीर्तितम् ॥ इति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मुखसन्ध्यङ्गानि

मुखसन्धेर्द्वादशाङ्गानि—

उपक्षेपः परिकरः परिन्यासो विलोभनम् ।
युक्तिः प्राप्तिः समाधानं विधानं परिभावना ॥
उद्भेदः करणं भेद एतान्यङ्गानि वै मुखे ।

तत्रोपक्षेपलक्षणम्—"काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः" । काव्यार्थश्च—"इतिवृत्तलक्षणप्रस्तुताभिधेयः" इत्युक्तं विश्वनाथेन । तत्र मुखसन्धेरुपक्षेपनामकं प्रथममङ्गं यथा—"तवास्मि गीतरागेण" इति । अत्र हि नाट्यबीजस्य मृगानुसारिदुष्यन्तरूपस्यार्थस्य समुत्पत्तिर्नाटकारम्भेण समायुक्ता वर्तते । शृङ्गारस्योत्साहरूपस्थायिभावस्य चात्र सम्भवोऽस्ति । तत्र 'तव गीतरागेण हृतोऽस्मि' इति शृङ्गारोद्भेदः । अतिरंहसा सारङ्गेण हृतो दुष्यन्त इवेति दुष्यन्तस्य मृगानुसारिण उत्साहरूपस्थायिभावस्योद्भेदः । अत्र नोत्साहो वीररसरूपतामाप्नोति, प्रतिपक्षागोचरत्वात्, उत्साहे च रसपदस्य रस्यत इति योगमाक्षिप्योपपत्तिसम्भवात् । अत्र नटीनटसंवादरूपस्य प्रकरणस्यैतत्पद्यान्तस्यामुखत्वमनेन पद्येन तु मुखसन्धेरुपक्षेपनामकमङ्गं सूच्यत इति ।

यत्तु मुखसन्धेः प्रथमाङ्गस्योपक्षेपस्योदाहरणम्—

जन्म यस्य पुरोर्वंशे युक्तरूपमिदं तव ।
पुत्रमेवं गुणोपेतं चक्रवर्तिनमाप्नुहि ॥

इत्युक्त्वा यथा च साहित्यदर्पणे—

काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ।

इत्युपक्षेपलक्षणमुपन्यस्तं श्रीजीवानन्दविद्यासागरेण । तत्रेदं विमृश्यते—काव्यार्थो नाम काव्यस्य प्राधान्येन प्रतिपाद्योऽर्थः । तस्य समुत्पत्तिरुपक्षेप इति हि लक्षणम् । काव्ये च प्राधान्येन प्रतिपाद्योऽर्थो नायकस्तद्वृत्तं वा । न त्वत्र दौष्यन्तिर्भरतस्तच्चरितं वा प्राधान्येन प्रतिपाद्यमित्यालोच्य "एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा" इत्यत्र नायकवृत्तस्य समुत्पत्त्या तदेवोदाहरणं युक्तमिति ।

मुखसन्धेर्द्वितीयमङ्गं परिकरो यथा—"शान्तमिदमाश्रमपदम्, स्फुरति च बाहुः, कुतः फलमिहास्य ? अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र" । परिकरलक्षणं तु दर्पणे—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः । इति ।

अत्र प्राक् समुत्पन्नस्य मृगकर्तृकस्य दुष्यन्तकर्मकस्याश्रमं प्रति हरणरूपस्यार्थस्य शकुन्तलाप्राप्तिरूपफलसम्भावनोपन्यासमुखेन विस्ताररूपं बाहुल्यं प्रदर्शितमिति लक्षणसमन्वयः ।

तृतीयमङ्गं परिन्यासो यथा—

असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः ।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥

परिन्यासलक्षणं तु—"तन्निष्पत्तिः परिन्यासः" इति । एतेन पूर्वापेक्षया शकुन्तलाप्राप्तिरूपस्य काव्यार्थस्य निश्चयविषयत्वेन संकीर्तनात् परिन्यासनामकं मुखसन्धेरङ्गं सूचितम् ।

चतुर्थं विलोभननामकं मुखसन्धेरङ्गम् । यथा—

इदं किलाव्याजमनोहरं वपुस्तपःक्लमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति ॥

इदमुपहितसूक्ष्मग्रन्थिना स्कन्धदेशे
स्तनयुगपरिणाहाच्छादिना वल्कलेन ।
वपुरभिनवमस्याः पुष्यति स्वां न शोभां
कुसुममिव पिनद्धं पाण्डुपत्रोदरेण ॥

सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू ।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥

अनेन श्लोकपञ्चकेनाऽलौकिकवपुःसौन्दर्यरूपगुणाख्यानाद् विलोभननाम मुखसन्ध्यङ्गं प्रदर्शितम् ।

पञ्चमं मुखसन्ध्यङ्गं युक्तिर्यथा—"राजा—वयमपि भवत्योः सखीगतं किञ्चित् पृच्छामः" इत्यारभ्य

भव हृदय साभिलाषं सम्प्रति सन्देहनिर्णयो जातः ।
आशङ्कसे यदग्निं तदिदं स्पर्शक्षमं रत्नम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्येतदन्ते ग्रन्थे युक्तिर्नाम मुखाङ्गं दर्शितम्। तथा च युक्तिलक्षणं दर्पणे—

"सम्प्रधारणमर्थानां युक्तिरिति।"

प्राप्तिरूपं मुखसन्ध्यङ्गं यथा—"भव हृदय! साभिलाषम्" इत्यस्मात् परस्मिन् ग्रन्थे राज्ञः शकुन्तलाविलोकनेन सुखागमरूपा प्राप्तिः। शकुन्तलायाश्च राजविलोकनेन सुखागमरूपा प्राप्तिः सूच्यते। तद्यथा राजकर्तृकशकुन्तलाविवाहविषयके प्रियंवदां प्रति प्रश्ने प्रियंवदा-प्रतिवचनेन प्रकुपितामिवोटजं प्रति गन्तुमुद्यतां राजकर्मकसस्पृहमुहुरवलोकनसम्भावितानुरागां शकुन्तलामनुसूया यद् वारयति तेन गम्यते।

किञ्च, यत् प्रियंवदावचनं शकुन्तलां प्रति "द्वे मे वृक्षसेचनके धारयसि ताभ्यां तावदात्मानं मोचय। ततो गमिष्यसि" इति व्याजेन गमनवारणरूपं तेनाप्येतद् गम्यते। यदपि शकुन्तलाया आत्मगतं वचनं "नैनं जनं पर्यहरिष्यं यद्यात्मनः प्राभविष्यम्" इति वचनं तेनापि प्राप्तिर्व्यज्यत एव।

किञ्च, यदपि "हला! अनुसूये! अभिनवकुशसूचिपरिक्षतं मे चरणं कुरवकशाखा-परिलग्नं च वल्कलं तावत् प्रतिपालयतं मां यावदेनद् मोचयामि" इति राजदिदृक्षया सव्याजं विलम्ब्यावस्थानपूर्वकवचनं तेनापि प्राप्तिः सूच्यत एव।

किञ्च, यदपि प्रियंवदां प्रति—"इदानीं किं तवायत्ताऽस्मि, यदा मे रोचते तदा गमिष्यामि" इति शकुन्तलावचनं तेनाप्येषा ज्ञाप्यत एव। किञ्च, राज्ञोऽपि शकुन्तलादर्शनेन सुखागमरूपा प्राप्तिः। "राजा—(स्वगतम्) कथमियं गच्छति" इत्यादिना गद्येन,

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः।
स्वस्थानादचलन्नपि गत्वेव पुनः प्रतिनिवृत्तः॥

इति पद्येन च सुव्यक्तमवभास्यते।

किञ्च, यदपि राज्ञो वचनं "गताः सर्वाः। भवतु अहमपि गच्छामि। शकुन्तलादर्शनादेव मन्दौत्सुक्योऽस्मि नगरगमनं प्रति यावदनुयात्रिकान् अतिदूरे तपोवनस्य निवेशयामि, न खलु शक्तोऽस्मि शकुन्तलादर्शनव्यापारादात्मानं निवर्तयितुम्" इति, तेनापि राज्ञः शकुन्तलादर्शन-जनिता सुखागमरूपा प्राप्तिः संसूच्यत एव। एवम् —

गच्छति पुरः शरीरं धावति पश्चादसंस्तुतं चेतः।
चीनांशुकमिव केतोः प्रतिवातं नीयमानस्य॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति पद्येनापि । सप्तमं मुखसन्ध्यङ्गं समाधानं यथा—"भव हृदय ! साभिलाषमिति" अत्र शकुन्तलाप्राप्तिबीजस्य "तदिदं स्पर्शक्षमं रत्नम्" इत्युपन्यासः । तल्लक्षणं तु "बीजस्यागमनं यत्तु तत्समाधानमुच्यते" इति । मुखसन्धेः ष्टममङ्गं सुखदुःखसमुद्भेदरूपं विधानं यथा—

"राजा—(निरूप्य) अहो ! मधुरमासां दर्शनम् । शुद्धान्तदुर्लभमिमम्" इत्यारभ्य "राजा—(सविस्मयम्) अहो ! असाधुदर्शी खलु भगवान् कण्वः । य इमामाश्रमधर्मे नियुङ्क्ते, इदं किलाव्याजमनोहरं वपुः" इत्यन्तेन सन्दर्भेण सूच्यते । तथाहि आदौ "अहो मधुरमासां दर्शनम्" इत्यन्तेन शकुन्तलातत्सखीदर्शनजन्यो राज्ञो हर्षातिरेकः सूच्यते । अन्ते च "अहो ! असाधुदर्शी खलु भगवान् कण्वः" इत्यत्र अहो इति खेदे । इदं किलाव्याजमनोहरं वपुरित्यत्र किलेत्यरुचौ । 'किल सम्भाव्यवार्तयोः । हेत्वरुच्योरलीके च' इति हैमः । इत्येवमाभ्यां पदाभ्यां शकुन्तलायाः श्रमातिरेकदर्शनजन्यं दुष्यन्तस्य सूच्यत इति । विधानलक्षणं तु दशरूपके—"विधानं सुखदुःखकृदिति" । मुखसन्धेर्नवममङ्गं परिभावना । यथा—

"राजा—(स्वगतम्) कथमियं गच्छति ? (जिघृक्षुरिव पुनरिच्छां निगृह्य) अहो ! चेष्टानुरूपिणी कामिजनमनोवृत्तिः । अहं हि—

अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्वस्थानादचलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥

अत्र अहो इति आश्चर्योपन्यासपुरस्सरं राज्ञ एतानि वचनानीति परिभावना व्यक्तीकृता । तदुक्तं दर्पणे—

कुतूहलोत्तरा वाचो विज्ञेया परिभावना । इति ।

मुखसन्धेर्दशममङ्गमुद्भेदो यथा—

"शकुन्तला—(आत्मगतम्) नैतं जनं पर्यहरिष्यं यद्यात्मनः प्राभविष्यम्" इत्यनेन राजविषयकस्य गूढरूपस्य शकुन्तलागतस्य भावस्योद्भेदनादुद्भेदो नाम मुखसन्ध्यङ्गं निवेशितम् । तथा च दर्पणे—"बीजार्थस्य प्ररोहः स्यादुद्भेदः" इति । एवं राजविषयकस्य शकुन्तलागतस्य भावस्योद्भेदः । "वाचं न मिश्रयति यद्यपि मद्वचोभिः" इत्यनेनापि पद्येन सूच्यते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

मुखसन्धेरेकादशमङ्गं करणं यथा—"प्रियंवदा (शकुन्तलामुपेत्य)—हला ! चण्डि नार्हसि गन्तुम्" इत्यारभ्य "तदहमेनामनृणां करोमि इत्यङ्गुलीयकं ददाति" इत्यन्तेन करणं नाम मुखसन्ध्यङ्गं प्रदर्शितम्। तथा च दर्पणे—

"करणं पुनः प्रकृतार्थसमारम्भः" इति।

अत्र हि शकुन्तलारञ्जनरूपस्य प्रकृतार्थस्य समारम्भो वर्तते।

मुखसन्धेर्द्वादशमङ्गं भेदो यथा—"प्रियंवदा—आर्य! धर्माचरणपरवश एव जनः। गुरोः पुनरस्या अनुरूपवरप्रदाने संकल्पः" इत्यनेन वाक्येन शकुन्तलागतस्य राज्ञोऽनुरागस्य प्रोत्साहना क्रियत इति भेदः। तथा च भेदरूपस्य मुखसन्ध्यङ्गस्य लक्षणं दशरूपके—

"भेदः प्रोत्साहना मता" इति।

इतः प्रागपि "शृणोत्वार्यः, अस्ति कौशिक इति गोत्रनामधेयः महाप्रभावो राजर्षिः" इत्यारभ्य कौशिकादप्सरसि मेनकायां शकुन्तलासम्भवविज्ञापनपरेणानुसूयावाक्येनापि राज्ञः शकुन्तलानुरागस्य प्रोत्साहना कृतेति तेनापि भेदो नाम मुखसन्ध्यङ्गं व्यज्यत एव। एवं शकुन्तलागतस्यापि दुष्यन्तानुरागस्य प्रोत्साहना। यथा—"(नेपथ्ये) भोः! भोस्तपस्विनः! तपोवनसन्निहितसत्त्वरक्षणाय सज्जीभवन्तु भवन्तः। प्रत्यासन्नः किल मृगयाविहारी राजा दुष्यन्तः" इत्यत्र राजनामश्रावणेन शकुन्तलाया अनुरागस्य प्रोत्साहनात् (प्रवर्धनात्) भेदो नाम मुखसन्ध्यङ्गमिति।

अथात्र प्रतिमुखसन्धिः साङ्गः परीक्ष्यते। तल्लक्षणं यथा दशरूपके—"लक्ष्यालक्ष्यतयोद्भेदस्तस्य प्रतिमुखं भवेत्। बिन्दुप्रयत्नानुगमात्" इति। दर्पणे तु—

फलप्रधानोपायस्य मुखसन्धिनिवेशिनः।
लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखं च तत्॥ इति।

अत्र तृतीयेऽङ्के दुष्यन्तशकुन्तलासमागमहेतोरनुरागबीजस्य प्रथमाङ्कोपक्षिप्तस्य प्रथमाङ्के प्रियंवदानुसूयाभ्यां ज्ञाततया किञ्चिल्लक्ष्यस्य द्वितीयेऽङ्के दुष्यन्तविदूषकयोः संवादेन स्फुटं लक्ष्यतयोद्भेदः। अग्रेऽपि तृतीयेऽङ्के प्रियंवदानुसूययोः शकुन्तलया सह संवादेन स्फुटमुद्भेदः। तत्रोभयत्रापि कविना सप्रयत्नं बिन्दुः कौशलेन निवेशितः। बिन्दुलक्षणं तु दर्पणे—

अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणमिति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तत्र द्वितीयेऽङ्के तावद् राजप्रवेशेन तद्रक्षाविधानेन च जातस्य शकुन्तलाकथाविच्छेदस्याच्छेदकारणं बिन्दुवाक्यं राजद्वारोपन्यासितं कविना—"सखे ! अनाप्तचक्षुःफलोऽसि" इत्यादिना ।

अथ प्रतिमुखाङ्गानि

तत्र यद्यपि साहित्यदर्पणे प्रतिमुखाङ्गानि शमेन परिहीणानि तापनसहितानि त्रयोदशोपन्यस्तानि, दशरूपके तु तापनरहितानि शमसहितानि तान्येव त्रयोदशोपन्यस्तानि, तथाप्युभयत्रोभयोरप्रत्याख्यानाद् गुणोपसंहारन्यायेनेतरत्रानुक्तमितरत्रोक्तमुपसंहर्तव्यमित्येवं चतुर्दश प्रतिमुखाङ्गानि सम्पद्यन्ते । तानि नामतो यथा दर्पणे—

विलासः परिसर्पश्च विधुतं तापनं तथा ।
नर्म नर्मद्युतिश्चैव तथा प्रगमनं पुनः ॥
विरोधश्च प्रतिमुखे तथा स्यात् पर्युपासनम् ।
पुष्पं वज्रमुपन्यासो वर्णसंहार इत्यपि ॥

तत्र विलासलक्षणं दर्पणे—"समीहा रतिभोगार्था विलास इति कथ्यते" । व्याख्यातं च तत्रैव—"रतिलक्षणस्य भावस्य यो हेतुभूतो भोगो विषयः प्रमदा पुरुषो वा तदर्था समीहा विलासः । यथा शाकुन्तले द्वितीयेऽङ्के—"राजा—(आत्मगतम्)

कामं प्रिया न सुलभा मनस्तु तद्भावदर्शनाकाङ्क्षि ।
अकृतार्थेऽपि मनसिजे रतिमुभयप्रार्थना कुरुते ॥

अत्र नायकगतस्य शकुन्तलाविषयकरतिलक्षणभावस्य हेतुभूतो भोगः (भोग्यपदार्थः) शकुन्तलारूपो यो विषयस्तदर्था समीहा राज्ञो वर्तत इति विलासोदाहरणम् ।

अथ परिसर्पो नाम प्रतिमुखसन्धेर्द्वितीयमङ्गं शाकुन्तले द्वितीयेऽङ्के—"राजा—(अवलोक्य) हन्तास्मिन् वेतसलतामण्डपे सन्निहितया शकुन्तलया भवितव्यम् । तथाहि—

अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात् ।
द्वारेऽस्य पाण्डुसिकते पदपङ्क्तिर्दृश्यतेऽभिनवा ॥

अत्रेष्टाया अदृश्यमानायाः शकुन्तलाया अन्वेषणरूपः परिसर्पः । परिसर्पलक्षणं दर्पणे यथा—

इष्टनष्टानुसरणं परिसर्पश्च कथ्यते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इष्टस्य वस्तुनो नष्टस्य (अदृष्टस्यानुसरणम्) अन्वेषणं परिसर्पः कथ्यत इत्यर्थः ।

प्रतिमुखसन्धेस्तृतीयमङ्गं विधुतम् । तल्लक्षणं दशरूपके—"विधुतं स्यादरतिः" इति । दर्पणे तु—

कृतस्यानुनयस्यादौ विधुतं त्वपरिग्रहः ।

आदौ कृतस्यानुनयस्यापरिग्रहस्तु विधुतमिति योजना । अनयोर्लक्षणयोर्दर्पणोक्त-लक्षणमेव युक्तं प्रतिभाति, नाम्नो योगार्थानुगमात् ।

यत्तु केनचिदरतिरूपं विधुतलक्षणमभ्युपगम्य तदुदाहरणमुपन्यस्तं तृतीयेऽङ्के—"शकुन्तला—(सखेदम्) किं वीजयतो मां प्रियसख्यौ" इति । यच्च लक्षणसङ्गमनावसरे उक्तम्—"एतेन सन्तापाधिक्यं तेन च विषयान्तरज्ञानराहित्यं ध्वन्यते" इति । अत्रेदं वक्तव्यम्—वीजयत इति तिङन्तपदात् प्राक् प्रयुज्यमानं किंपदं प्रश्नार्थकं न भवति, प्रष्टव्यार्थकपदाद् उत्तरं प्रयुज्यमानं हि किंपदं प्रश्नार्थकं भवतीति नियमस्य किंपदस्वभावसिद्धत्वात् । अतोऽत्र प्रियसखीकर्तृकस्वकर्मकव्यजनक्रियाज्ञानसत्त्वेऽपि वैयर्थ्येन वार्यमाणा सन्तापाधिक्यं व्यनक्तीत्येव समुचितमिति ।

वस्तुतस्तु प्रागुक्तरीत्या समुचितस्यात्र प्रागुक्तस्य दर्पणोक्तविधुतलक्षणस्योदाहरणं शाकुन्तलादुद्धृतं दर्पणोक्तमेव युक्तम् । तद्यथा—"अलं वामन्तःपुरविरहपर्युत्सुकेन राजर्षिणोप-रुद्धेन" इति शाकुन्तलवाक्यम् । अत्र सखीभ्यां कृतस्य राजकर्मकानुनयस्य नगरगमननिवृत्ति-फलकस्य शकुन्तलया कर्तव्यत्वेनापरिग्रह इति ।

अथ शमरूपं दशरूपकोक्तं प्रतिमुखं सन्ध्यङ्गम् । यथा तृतीयेऽङ्के—"शकुन्तला—तद्यदि वामनुमतं ततस्तथा वर्तितव्यं यथा तस्य राजर्षेरनुकम्पनीया भवामि । अन्यथा स्मरतं माम्" इति । अत्र हि दुष्यन्तसंयोगेन शकुन्तलाया अरतेरुच्छेदः ।

अथ प्रतिमुखसन्ध्यङ्गं तापनम् । यथा तृतीयेऽङ्के—"राजा—(सचिन्तं निःश्वस्य)

जाने तपसो वीर्यं सा बाला परवतीति मे विदितम् ।
न च निम्नादिव सलिलं निवर्तते मे ततो हृदयम् ॥

अत्र हि बलात् शकुन्तलाया हरणरूप उपायः "जाने तपसो वीर्यम्" इति वाक्येन प्रतिषिद्धः । अनुरक्ता शकुन्तला स्वयं मां वरीष्यत इत्येषोऽपि शकुन्तलाप्राप्त्युपायः सा

CC-0. Sampurnanand University Collection. Digitized by eGangotri

बालेत्यप्रगल्भत्वोपन्यासेन परवतीति च पराधीनत्वोपन्यासेन प्रत्याख्यात इत्युपायादर्शनादत्र तापनं साधूपन्यस्तम् । तथा च तापनलक्षणं दर्पणे—

उपायादर्शनं यत्तु तापनं नाम तद्भवेत् । इति ।

नर्माख्यं प्रतिमुखसन्ध्यङ्गं यथा शाकुन्तले तृतीयेऽङ्के—"राजा—(उपविश्य) कच्चित् सखीं वो नातिबाधते शरीरतापः ? प्रियंवदा—(सस्मितम्) इदानीं लब्धौषध उपशमं गमिष्यतीति ।"

नर्मलक्षणं तु साहित्यदर्पणे—"परिहासवचो नर्म" इति । नाट्यशास्त्रेऽप्युक्तम्—

"क्रीडार्थं विहितं यत्र हास्यं नर्मेति तत् स्मृतम्" इति ।

नर्मद्युतिः शाकुन्तले तृतीयेऽङ्के—"राजा—(सस्मितम्)

अपराधमिमं ततः सहिष्ये यदि रम्भोरु ! तवाङ्गसङ्गमृष्टे ।
कुसुमास्तरणे क्लमापहेऽत्र स्वजनत्वादनुमन्यसेऽवकाशम् ॥

प्रियंवदा—(सोपहासम्) नन्वेतावन्मात्रेण पुनस्तुष्टो भविष्यति । शकुन्तला—(सरोषमिव) विरम विरम दुर्विनीते ! एतावदवस्थां गतया मया क्रीडसि । अत्र भरतः—

"दोषप्रच्छानार्थं तु नर्मद्युतिरिति स्मृतम्" इति ।

अत्र स्वगतस्य राजविषयकानुरागरूपदोषस्य प्रच्छादनार्थं शकुन्तलाया इयमुक्तिः ।

शाकुन्तले तृतीयेऽङ्के प्रगमनम् । यथा—"शकुन्तला—अर्हति खलु महाराज इदं विसोढुं परोक्षं वा न किं को मन्त्रयति । राजा—(सस्मितम्) अपराधमिममित्यादि" इति शकुन्तला-दुष्यन्तयोरुत्तरोत्तरं वाक्यम् । मन्दारमरन्दे प्रगमनलक्षणं यथा—

तस्यानुरागबीजस्य चोत्तरोत्तरभाषणैः ।
प्रकाशनं प्रगमनमिति नाट्यविदो विदुः ॥

विरोधो यथा शाकुन्तले द्वितीयेऽङ्के—रक्षसां तपस्विविरोधे तपस्विनां व्यसनप्राप्तिः सूचिता । अत्रान्येषां व्यसनमुपदर्शयता नायककर्तृकां तन्निवृत्तिं प्रदर्शयता नायकस्य च व्यसनमप्रदर्शयता नाटकनिर्माणे महत् कौशलं प्रदर्शितम् ।

यत्तु केनचिदुक्तमभिज्ञानशाकुन्तले तृतीयेऽङ्के—"शकुन्तला—(कर्णं दत्त्वा ससम्भ्रमम्) आर्यपुत्र ! एषा खलु तातकण्वस्य धर्मकनीयसी नाम वृत्तान्तोपलम्भननिमित्तमार्या गौतमी आगच्छति, तद् विटपान्तरितो भव ।" राजा—तथा (इत्येकान्ते स्थितः)" इति । अत्र

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विरोधो नाम प्रतिमुखाङ्गं प्रदर्शितम्। यदाह दर्पणे—"विरोधो व्यसनप्राप्तिः" इति। अत्र विच्छेद एव व्यसनमिति। अत्रेदं वक्तव्यम्—विरोधहेतुका व्यसनप्राप्तिरेव विरोध इति युक्तम्। अत्र तु नास्ति शकुन्तलादुष्यन्तयोर्गौतमीशकुन्तलयोर्वा विरोध इति। पर्युपासनं तृतीयेऽङ्के यथा—"शकुन्तला—अर्हति खलु महाराज इदं विसोढुं परोक्षं वा न किं को मन्त्रयति" इति। अत्र हि क्रुद्धत्वेन प्रतीतस्य राज्ञोऽनुनयः क्रियते। स चात्र खलुशब्देन द्योत्यते, "निषेधवाक्यालङ्कारजिज्ञासानुनये खलु" इत्यमरोक्तेः। पर्युपासनलक्षणं तु दर्पणे—

"....कृतस्यानुनयः पुनः स्यात् पर्युपासनम्" इति।

नाट्यशास्त्रेऽपि—

"क्रुद्धस्यानुनयो यस्तु भवेत् तत् पर्युपासनम्" इति।

अत्र क्रुद्धस्येत्यस्य क्रुद्धत्वेन सम्भावितस्येत्यर्थः। वस्तुतोऽत्र राज्ञि कोपाभावादिति। पुष्पं नाम प्रतिमुखाङ्गं यथा शाकुन्तले तृतीयेऽङ्के—

तस्याः पुष्पमयी शरीरलुलिता शय्या शिलायामियं
कान्तो मन्मथलेख एष नलिनीपत्रे नखैरर्पितः।
हस्ताद् भ्रष्टमिदं बिसाभरणमित्यासज्जमानेक्षणो
निर्गन्तुं सहसा न वेतसगृहादीशोऽस्मि शून्यादपि॥

इति राज्ञो वाक्ये। इदं हि पद्यात्मकं नानावाक्यकदम्बकरूपं राज्ञो महावाक्यं स्वगतं शकुन्तलाविषयकं रागमभिव्यञ्जयतीति।

पुष्पलक्षणं दर्पणे—"पुष्पं विशेषवचनं मतम्" इति। विशेषवचनमित्यस्यानुराग-व्यञ्जकं वचनमित्यर्थः। यत्तु--अनुरागजनकमिति व्याख्यातं केनचित् तत् प्राक्स्थितस्या-नुरागस्य व्यञ्जनाद् हेयम्। यत्तु अत्रोदाहृते शाकुन्तलवाक्ये चतुर्थचरणेऽनुरागव्यञ्जकशब्द-सद्भावात् पुष्पं नाम प्रतिमुखाङ्गं दर्शितमित्युक्तं केनचित् तदपव्याख्यानम्, कृत्स्नस्यैव पद्यस्यानुरागव्यञ्जकत्वात्।

वज्रं यथा शाकुन्तले द्वितीयेऽङ्के—"विदूषकः—(सरोषम्) अपेहि रे! उत्साहहेतुक! अत्रभवान् प्रकृतिमापन्नः। त्वं तावद् दास्याः पुत्रोऽटवीतोऽटवीमाहिण्डमानो यावद् नरनासिकालोलुपस्य कस्यापि जीर्णर्क्षस्य मुखे निपतितो भव" इति। अत्र हि सेनापति-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विदूषकयोः परस्परजनान्तिकामन्त्रणपूर्वकेऽस्मिन् वाक्ये परोक्षं निष्ठुरत्वाभावेऽपि प्रत्यक्ष-निष्ठुरत्वात् "प्रत्यक्षनिष्ठुरं वज्रम्" इति दर्पणोक्तलक्षणं साधु सङ्गच्छते। मुनिनाऽप्युक्तम्—

"विरूक्षवचनप्रायं वज्रमित्यभिधीयते" इति।

शाकुन्तले तृतीयेऽङ्के उपन्यासो नाम प्रतिमुखाङ्गं यथा—"राजा—सुन्दरि! अलमावेगेन, नन्वयमाराधयिता जनस्ते सखीभूमौ वर्तते। तदुच्यताम्—

किं शीकरैः क्लमविमर्दिभिरार्द्रवातं सञ्चालयामि नलिनीदलतालवृन्तम्।
अङ्के निधाय चरणावुत पद्मताम्रौ संवाहयामि करभोरु! यथा सुखं ते॥

अत्र हि स्वाभीष्टसिद्ध्यै अनुकूलीकरणरूपं प्रसादनं नलिनीदलव्यजनसञ्चालनपाद-संवाहनक्रियाभ्यां सूच्यते। उपन्यासलक्षणं दर्पणे यथा—'उपन्यासः प्रसादनम्' इति।

नन्वेवमुपन्यासपर्युपासनयोः को भेदः? इति चेन्न, क्रुद्धस्य क्रुद्धत्वेन प्रतीतस्य वाऽनुनयः पर्युपासनम्। उपन्यासस्तु स्वाभीष्टसिद्ध्यै अक्रुद्धस्यैवानुकूलीकरणमिति भेदात्। एवञ्च उपन्यासः प्रसादनमिति लक्षयित्वा यद् रत्नावल्यां सुसङ्गतावाक्यमुदाहृतं दर्पणकृता—"यत् त्वयाहमत्रालिखितेति कुपिता मे प्रियसखी सागरिका। एषैव प्रसाद्यताम्" इति। तदिदं पर्युपासनस्योदाहरणं न तूपन्यासस्येत्यवधेयम्। नाट्यशास्त्रे त्विदमेवोपन्यासलक्षणमुपलभ्यते—

"उपपत्तिकृतो ह्यर्थ उपन्यासः स कीर्तितः" इति।

अस्यार्थः—नानाविधाभिरुपपत्तिभिः कृतः सम्पादितोऽर्थः प्रयोजनमुपन्यास इति। तस्याप्युपन्यासः प्रसादनमित्यत्रैव तात्पर्यम्।

वर्णसंहारः शाकुन्तले तृतीयेऽङ्के राज्ञः सखीद्वयसहितायाः शकुन्तलाया उपसर्पणावसरे। यद्यपि—"चातुर्वर्ण्योपगमनं वर्णसंहार इष्यते" इति साहित्यदर्पणे चातुर्वर्ण्यसमागम एव वर्णसंहार इत्युक्तम्, तथापि वर्णशब्देन पात्राण्युपलक्ष्यन्ते। "संहारो मेलनम्" इत्यभिनवगुप्तपाद-पद्धतिमनुश्रित्य सम्भवत्यत्र वर्णसंहार इति।

इदं त्वत्र विमृश्यते—दर्पणकारादिमते तृतीयेऽङ्के गर्भसन्धिः, द्वितीयेऽङ्के प्रतिमुख-सन्धिरिति। तदिदं न युक्तम्, भूयोभिरङ्गैर्मल्लग्रामादिवद् व्यपदेशो भवति। अत्र तु तृतीयेऽङ्के क्रमो नाम गर्भसन्ध्यङ्गं घुणाक्षरन्यायेन काकतालीयन्यायेन वा क्रमच्छायानुकारी न गर्भसन्धेस्तृतीयेऽङ्के संस्थितिं सूचयितुमलम्। भूयांसि तु प्रतिमुखसन्धेरङ्गानि प्रागुपदर्शितानि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यत्नत उपनिबद्धानि न घुणाक्षरन्यायेनोपनिपातीनि वाक्यानि विज्ञातुमिति तानि प्रतिमुखसन्धि तृतीयेऽङ्के सूचयितुं ध्रुवं प्रभवन्तीति प्रतिमुखसन्धिरेव तृतीयेऽङ्के युक्ता। गर्भसन्धिस्तु वक्ष्यते।

अत्र चतुर्थेऽङ्के गर्भसन्धेरङ्गानि। तत्र प्रथमभूताहरणं नाम तदङ्गं यथा शकुन्तलायाः आश्रमात् पतिगृहं प्रति प्रस्थानावसरे—"सख्यौ—(तथा कृत्वा) सखि! यदि नाम स राजर्षिः प्रत्यभिज्ञानमन्थरो भवेत् तदाऽस्येदमात्मनो नामधेयाङ्कितमङ्गुरीयकं दर्शयिष्यसि। शकुन्तला—अनेन वां सन्देशेन कम्पितं मे हृदयम्। सख्यौ—सखि! मा बिभेहि, स्नेहः पापमाशङ्कते" इति। अत्र हि व्याजेन शापस्य गोपनवाक्यमिति प्रभूताहरणम्।

यत्तु केनचिच्चतुर्थेऽङ्के एव—"अनुसूया—हला! द्वयोरेव नौ हृदये एष वृत्तान्तस्तिष्ठतु। रमणीया खलु प्रकृतिपेलवा प्रियसखी" इति। अत्र शकुन्तलां प्रति शापाकथनादभूताहरणं नाम गर्भसन्ध्यङ्गं प्रदर्शितमित्युक्तम्। तन्न युज्यते, अत्र सत्यं निह्नुत्यासत्यस्य कथनाभावात्। अभूताहरणम् इत्यन्वर्थं नाम। अभूतस्यासत्यस्याहरणम् आनयनं वाचा प्रापणमिति यावत्। यदाह दर्पणे—

तत्र व्याजाश्रयं वाक्यमभूताहरणं मतम्।

मार्गो नाम गर्भसन्ध्यङ्गम्। तथा शाकुन्तले चतुर्थेऽङ्के—

दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः।
अवेहि तनयां ब्रह्मन् अग्निगर्भां शमीमिव॥

अत्राऽशरीरिण्या वाचा तत्त्वार्थकथनान्मार्गो नाम गर्भसन्ध्यङ्गं प्रदर्शितम्। यदाह दर्पणे—"तत्त्वार्थकथनं मार्गः" इति।

रूपं नाम गर्भसन्धेरङ्गम्। यथा शाकुन्तले पञ्चमेऽङ्के—"राजा—(स्वगतम्) किन्तु खलु गीतमेवंविधमाकर्ण्य इष्टजनविरहादृतेऽपि बलवदुत्कण्ठितोऽस्मि"। अत्र हि इष्टजनविरह-बलवदुत्कण्ठारूपयोः परस्परविरोधित्वेन चित्रयोरर्थयोः समवायो वितर्कित इति रूपस्य रूपं साधु दृश्यते। तदुक्तं दर्पणे—"रूपं वाक्यं वितर्कवत्" इति। नाट्यशास्त्रेऽप्युक्तम्—"चित्रार्थ-समवायो यस्तद्रूपमिति कीर्तितम्" इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उदाहरणं नाम गर्भसन्ध्यङ्गं यथाऽभिज्ञानशाकुन्तले चतुर्थेऽङ्के—"गौतमी—जाते ! अनयाऽभ्युपपत्त्या सूचिता भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीः" । अत्र भाविराजलक्ष्मीप्राप्तिरूपोत्कर्षवचनमित्युदाहरणम् । तदुक्तं दर्पणे—"उदाहरणमुत्कर्षयुक्तं वचनमुच्यते" इति ।

क्रमो नाम गर्भसन्ध्यङ्गं नवीनमते भावतत्त्वोपलब्धिस्तु क्रमः स्यादिति लक्षणेन लक्षितम्, उदाहृतं च साहित्यदर्पणे यथा शाकुन्तले—"राजा—स्थाने खलु विस्मृतनिमेषेण चक्षुषा प्रियामवलोकयामि । तथाहि—

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः ।
पुलकाञ्चितेन कथयति मय्यनुरागं कपोलेन ॥

अत्र "भ्रूनेत्रादिविकारस्तु सम्भोगेच्छाप्रकाशको भावः" । तस्य तत्त्वोपलब्धिरूपः क्रमः स्फुट एव । प्राचीनमते तु "क्रमः सञ्चिन्त्य मानाप्तिः" इति लक्षणलक्षितः । शाकुन्तले तदुदाहरणं तु चतुर्थेऽङ्के—"प्रियंवदा—तत एनां लज्जावनतमुखीं परिष्वज्य तातकण्वेनैवमभिनन्दितम्—"वत्से, दिष्टया धूमोपरुद्धदृष्टेरपि यजमानस्य पावकस्यैव मुखे आहुतिर्निपतिता । सुशिष्यपरिदत्तेव विद्या अशोचनीयासि मे संवृत्ता । अद्यैव त्वामृषिपरिरक्षितां कृत्वा भर्तुः सकाशं विसर्जयामि ।" अत्र कण्वेन मनसा सञ्चिन्त्यमानस्य शकुन्तलावरस्यानायासेनाप्तिरिति क्रमः ।

किञ्च, शकुन्तलया संचिन्त्यमानस्य पतिगृहगमनस्य कण्वमुखेनाप्तिरित्येवमपि क्रमः । प्राचीनाअपि केचन भावतत्त्वोपलब्धिरूपं क्रमं मन्वते । अत एव दशरूपके—"भावज्ञानमथापरे" इत्युक्तं प्रकाशे ।

वस्तुतस्तु हृद्गतस्य भावस्य निगूढस्य भ्रूनेत्रादिविकारैः सर्वत्रापि क्रमेणैवोपलम्भात् क्रमोपलक्षितो भावज्ञानक्रम इति युज्यते वक्तुम् । सञ्चिन्त्यमानाप्तिस्तु क्रमेणाक्रमेण सहसापि सम्भवतीति क्रमानियमाद् न क्रमस्य लक्षणं भवितुमर्हति । अत एव नवीनैर्भावतत्त्वोपलब्धिरूप एव क्रम उक्तः ।

साहित्यदर्पणे गर्भसन्ध्यङ्गस्य संग्रहस्य लक्षणमुक्तम्—"सामदानार्थसम्पन्नः" इति । व्याख्यातं च रामचरणतर्कवागीशैः—"प्रियवचनं साम, तेन दानेन चार्थस्य सम्पत्तिरित्यर्थः । उदाहृतं च साहित्यदर्पणे—"यथा रत्नावल्याम्—"राजा—साधु वयस्य ! इदं ते पारितोषिकमिति कटकं ददाति" । एवमेव शाकुन्तले संग्रहोदाहरणम्—"शार्ङ्गरवः—यन्मिथः समयादिमां मदीयां दुहितरं भवान् उपयेमे तन्मया प्रीतिमता युवयोरनुज्ञातम् । कुतः—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

त्वमर्हतामग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमतीव सत्क्रिया ।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः ॥

तत इदानीमापन्नसत्त्वेयं गृह्यतां गृहधर्मचरणाय" इति । अत्र हि दुष्यन्तं प्रति कण्वस्य प्रियवचनरूपं सामपूर्वमुपन्यस्तम् । ततो गृह्यतामियमिति प्रतिग्रहप्रैषो दानलिङ्गमिति सामदानार्थसम्पन्नमेतद् वच इति संग्रहोदाहरणं भवति ।

अनुमानरूपं गर्भसन्ध्यङ्गं यथा शाकुन्तले चतुर्थेऽङ्के—"शार्ङ्गरवः—(कोकिलशब्दं सूचयित्वा) भगवन् !

अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यतः प्रतिवचनीकृतमेभिरात्मनः ॥

अत्र परभृतवचनमित्यादितपोवनदेवताकर्तृकगमनानुज्ञाने लिङ्गमुपन्यस्तम् , यत इति हेतुपञ्चम्यर्थकतसिल्श्रवणात् । एवमत्रैवाङ्के—

उद्गीर्णदर्भकवला मृगी परित्यक्तनर्तना मयूरी ।
अपसृतपाण्डुपत्रा मुञ्चन्त्यश्रिव लताः ॥ इति ।

इति शकुन्तलावियोगोत्थदुःखानुमाने लिङ्गरूपतयोपन्यस्तम् । प्रार्थनाख्यगर्भसन्ध्यङ्गं शाकुन्तले चतुर्थेऽङ्के यथा—

"कण्वः—अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तत् स्त्रीबन्धुभिर्याच्यते ॥

अत्र हि "भाग्यायत्तमतः परं न खलु तत् स्त्रीबन्धुभिर्याच्यते" इत्यनेन 'सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया'•इत्येतावदेव याच्यत इति गम्यते । याच्धातुश्च प्रार्थनायां प्रसिद्धः । प्रार्थनालक्षणं तु—

'रतिहर्षोत्सवार्थानां प्रार्थना प्रार्थना भवेत् '

इति नाट्यशास्त्रे ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अत्र रतिहर्षोत्सवानां साधनीभूतोऽर्थः प्रार्थित इति प्रार्थना। यद्यपि दशरूपके प्रार्थनानामकं सन्ध्यङ्गं नोपन्यस्तम्, साहित्यदर्पणे तूपन्यस्तम्, तथापि प्रार्थनाप्रशस्तिनामकेन सन्ध्यङ्गेन विकल्प्यत इति मुनेरभिप्रायं वर्णयन्ति दर्पणकृतः। अन्यथा सन्ध्यङ्गानां चतुःषष्टित्व-संख्योपन्यासो मुनिकर्तृको विरुध्यत इति च ते वदन्ति। शाकुन्तले प्रशस्तिनामकं निर्वहणसन्ध्यङ्ग-मप्युपन्यस्तमित्यहो महाकवेर्नाटकाङ्कनिर्वाहकौशलम्। यत्र खलु द्वित्रसन्ध्यङ्गयोगेनापि नाटक-निर्वहणं मुनिनाऽप्यनुज्ञातम्—

सर्वाङ्गाणि कदाचित्तु द्वित्रयोगेन वा पुनः।
ज्ञात्वा कार्यमवस्थां च योज्यान्यङ्गानि सन्धिषु॥

इति नाट्यशास्त्रे।

अत्र सर्वाङ्गाणां निर्वहणपुरस्सरं विकल्पितस्याप्यङ्गस्य निर्वहणं कवेः कविकर्मणि महत् कौशलं प्रख्यापयति। प्रशस्तिनामकं निर्वहणसन्ध्यङ्गं तु शाकुन्तलान्ते यथा—

प्रवर्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती न हीयताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः॥

अत्र हि नृपाद् देवाच्च प्रकृष्टस्यार्थस्य परकीयस्य स्वकीयस्य चाशंसनं प्रशस्तिरूप-मुपन्यस्तम्। प्रशस्तिलक्षणं यथा—

"नृपदेवप्रशस्तिश्च प्रशस्तिरभिधीयते"

इति नाट्यशास्त्रे।

क्षिप्तिनामकं गर्भसन्ध्यङ्गं यथा शाकुन्तले पञ्चमेऽङ्के (नेपथ्ये गीयते)—

अभिनवमधुलोभभावितस्तथा परिचुम्ब्य चूतमञ्जरीम्।
कमलवसतिमात्रनिर्वृतो मधुकर! विस्मृतोऽस्येनां कथम्॥

अत्र शकुन्तलाविस्मरणरूपस्य रहस्यस्योद्भेदात् क्षिप्तिर्नाम गर्भाङ्गम्। यदाह दर्पणे—"रहस्यार्थस्य तूद्भेदात् क्षिप्तिः स्यात्" इति। दशरूपके तु क्षिप्तिरेवाक्षेपनाम्ना व्यवहृता। तल्लक्षणं यथा दशरूपके—

"गर्भबीजसमुद्भेदादाक्षेपः परिकीर्तितः" इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अस्यार्थः—गर्भभूतस्य गर्भवत् तिरोहितस्य रहस्यभूतस्य बीजार्थस्य प्रधानीभूतस्यार्थस्य समुद्भेदादाक्षेप इति। एवञ्च—"रहस्यार्थस्य तूद्भेदः" इति गर्भबीजसमुद्भेदादिति च समानार्थकमेव।

तोटकाख्यगर्भसन्ध्यङ्गं यथा शाकुन्तले चतुर्थेऽङ्के—(पुनर्नेपथ्ये) आः! कथमतिथिं मां परिभवसि?

विचिन्तयन्ती यमनन्यमानसा
तपोनिधिं वेत्सि न मामुपस्थितम्।
स्मरिष्यति त्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव॥ इति।

तोटकलक्षणं दर्पणे—"तोटकं पुनः संरब्धवाक्" इति।

अधिबलाख्यं गर्भसन्ध्यङ्गं यथा शाकुन्तले चतुर्थेऽङ्के—"सख्यौ—(तथा कृत्वा) यदि नाम स राजर्षिः प्रत्यभिज्ञानमन्थरो भवेत्, तदाऽस्येदमात्मनो नामधेयाङ्कितमङ्गुरीयकं दर्शयिष्यसि। शकुन्तला—"अनेन वां सन्देशेन कम्पितं मे हृदयम्"। सख्यौ—"सखि मा बिभेहि, स्नेहः पापमाशङ्कते"। अत्र प्रियंवदाऽनुसूयाभ्यां वाक्छलेनाभिसंहिता (वञ्चिता शकुन्तला)। तदुक्तं दशरूपके—"अधिबलमभिसन्धिः" इति। अत्राभिसन्धिर्वञ्चनम्। एतदानुरूप्येण "अधिबलमभिसन्धिश्छलेन यः" इति दर्पणेऽप्यभिसन्धिपदस्य वञ्चनैवार्थः।

यद्वा "तोटकस्यान्यथाभावं ब्रुवतेऽधिबलं बुधाः" इति दशरूपके धृतं ग्रन्थान्तरोक्तं लक्षणम्। तदुदाहरणं तु शाकुन्तले चतुर्थेऽङ्क एव यथा—"अनुसूया—यदा निवर्तितुं नेच्छति तदा पादयोः पतित्वा विज्ञापितौ मया—भगवन्! प्रथममिति प्रेक्ष्य अविज्ञाततपःप्रभावस्य दुहितृजनस्यायमपरो भवता मर्षयितव्यः" इति। अत्र हि सरोषवचनरूपस्य तोटकस्य वैपरीत्येनाऽनसूयायाः सान्त्ववचनमित्यधिबलम्।

उद्वेगाख्यं गर्भसन्ध्यङ्गं शाकुन्तले पञ्चमेऽङ्के। यथा—'शार्ङ्गरवः—(सरोषं प्रतिनिवृत्य) आः! पुरोभागिणि! किमिदं स्वातन्त्र्यमवलम्बसे? (शकुन्तला भीता वेपते)" इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यद्यपि दशरूपके "उद्वेगोऽरिकृता भीतिः" इत्युद्वेगलक्षणमुक्तम् तथापि तत्रारिग्रहणं भीतिहेतोरुपलक्षणम्। अत एव दर्पणे—"नृपादिजनिता भीतिरुद्वेगः परिकीर्तितः" इत्युक्तम्। एवञ्च स्वजनाद्भीतिरप्युद्वेगो भवतीति शार्ङ्गरववाक्ये लक्षणसमन्वयः।

विद्रवनामकसन्ध्यङ्गं यथा शाकुन्तले चतुर्थेऽङ्के—दुर्वाससः शापवाक्यश्रवणानन्तरं प्रियंवदानसूययोर्वाक्येषु—"अहो! आवेगस्खलितया गत्या परिभ्रष्टं मेऽग्रहस्तात् पुष्पभाजनम्" इत्यन्तेषु। अत्र हि प्रथमे शङ्का, द्वितीये चानसूयावाक्ये भयम्, अग्रे चोभयोर्वाक्येषु सम्भ्रमः। विद्रवलक्षणं तु दर्पणे—"शङ्काभयत्रासकृतः सम्भ्रमो विद्रवो मतः" इति। विद्रव एव च दशरूपके सम्भ्रमपदेन व्यवहृतः। तल्लक्षणं तु तत्रोक्तम्—"शङ्कात्रासौ च सम्भ्रमः" इति।

विमर्शसन्धिविमर्शः

अथ विमर्शसन्ध्यङ्गमपवादो यथा शाकुन्तले पञ्चमेऽङ्के—"राजा—(सस्मितम्) इदं तावत् प्रत्युत्पन्नमतित्वं स्त्रीणाम्" इति। अपरमपि तत्रैव—"राजा—आभिस्तावदात्मकार्यप्रवर्तिनीभिर्मधुराभिरनृतवाग्भिराकृष्यन्ते विषयिणः" इति। अपरमपि—"राजा—अयि तापसवृद्धे!

स्त्रीणामशिक्षितपटुत्वममानुषीणां
संदृश्यते किमुत याः प्रतिबोधवत्यः।
प्रागन्तरिक्षगमनात् स्वमपत्यजातम्
अन्यद्विजैः परभृताः किल पोषयन्ति॥ इति।

शकुन्तलावाक्यमपि—"(सरोषम्) अनार्य! आत्मनो हृदयानुमानेन किल सर्वं प्रेक्षसे। को नामान्यो धर्मकञ्चुकव्यपदेशिनस्तृणच्छन्नकूपोपमस्य तवानुकारी भविष्यतीति"? अपवादलक्षणं तु दशरूपके दर्पणे च—"दोषप्रख्यापवादः स्यात्" इति।

सम्फेटनामविमर्शसन्ध्यङ्गमप्यत्रैव शकुन्तलावाक्ये यतः "सम्फेटो रोषभाषणम्" इति तल्लक्षणं दर्पणे दशरूपके च।

व्यवसायो नाम विमर्शसन्ध्यङ्गं यथा शाकुन्तले षष्ठेऽङ्के—"राजा—भोः! तिरस्करणीगर्वित! किमिदानीं मदीयमस्त्रमपि त्वां न पश्यति? स्थिरो भव, मा च ते वयस्यसम्पर्काद् विश्लेषोऽभूत्। एष तमिषुं सन्दधे" इति। अत्र हि राज्ञोऽलौकिकस्य स्वसामर्थ्यस्योक्तेर्व्यवसायः। तथा च दशरूपके "व्यवसायः स्वशक्त्युक्तिः" इति। दर्पणे तु "व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः" इति व्यवसायलक्षणमुक्तम्। तदर्थस्तु प्रतिज्ञारूपेण हेतुना सम्भवो यस्य

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तादृशो व्यवसायः—कार्यं व्यवसाय इति। तस्याप्येतल्लक्ष्यम्। यथा ह्यत्र राज्ञाऽन्तर्हितसत्त्वस्य वधं प्रतिज्ञाय तदनुरूपशरसन्धानं कृतमिति।

यत्तु दर्पणव्याख्यायां रामचरणतर्कवागीशेन प्रतिज्ञाकार्यस्य निर्देशो हेतुः साधन-निर्देशस्तयोः सम्भवो मेलनमिति व्यवसायलक्षणवाक्यं व्याख्यातम्। तत्तु न दर्पणोदाहृते व्यवसायवाक्ये न वाऽस्मिन् शाकुन्तलीये व्यवसायवाक्ये संगच्छत इति हेयम्। यत्तु शाकुन्तले षष्ठेऽङ्के—"विदूषकः—भो वयस्य! तिष्ठ तावद् यावदनेन दण्डकाष्ठेन कन्दर्पबाणं नाशयामि" इति केनचिद् व्यवसाय उदाहृतः, तन्न सम्यक्, दण्डकाष्ठकरणकचूताङ्कुरपातन-सामर्थ्यस्य साधारणत्वेन व्यवसायलक्षणघटकशक्तिपदेनानभिप्रेतत्वादिति।

द्रवो नाम विमर्शसन्ध्यङ्गं यथा शाकुन्तले पञ्चमेऽङ्के—"राजा—अहो सत्यवादिनः! अभ्युपगतं तावद् अस्माभिः। एवंविधा एव वयम्। किं पुनरिमामभिसन्धाय लभ्यते?" अनेन शार्ङ्गरवं प्रति सोल्लुण्ठवचनेन आवेगसम्भवगुरुं व्यतिक्रान्तिसूचनादत्र द्रवः। द्रवलक्षणं तु दर्पणे यथा—"द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवः" इति।

द्युतिरूपं विमर्शसन्ध्यङ्गं यथा शाकुन्तले षष्ठेऽङ्के—"(नेपथ्ये) एष त्वामभिनवकण्ठ-शोणितार्थी शार्दूलः पशुमिव हन्मि चेष्टमानम्। आर्त्तानां भयमपनेतुमात्तधन्वा दुष्यन्तस्तव शरणं भवत्विदानीम्॥" इति। द्युतिलक्षणं तु दशरूपके—"तर्जनोद्वेजने द्युतिः" इति। एवमेव दर्पणेऽपि।

शक्तिनामकं विमर्शसन्ध्यङ्गं यथा शाकुन्तले पञ्चमेऽङ्के—"पुरोधाः (विचार्य) यदि तावदेवं क्रियताम्। राजा—अनुशास्तु मां गुरुः। पुरोधाः—अत्रभवती तावद् आप्रसवाद् अस्मद्गृहे तिष्ठतु। राजा—कुत इदम्। पुरोधाः—त्वं तावत् साधुनैमित्तिकैरुपदिष्टपूर्वः प्रथममेव चक्रवर्तिनं पुत्रं जनयिष्यसीति। स चेन्मुनिदौहित्रस्तल्लक्षणोपपन्नो भविष्यति, ततोऽभिनन्द्य शुद्धान्त-मेनां प्रवेशयिष्यसि, विपर्यये त्वस्याः पितुः समीपगमनं स्थितमेव"। अत्र शकुन्तलादुष्यन्तयो-र्विरोधप्रशमनरूपा शक्तिः। शक्तिलक्षणं तु दशरूपके—"विरोधशमनं शक्तिः" इति। दर्पणे-ऽप्येवमेव।

यत्तु केनचित्—"स्त्रीसंस्थानमप्सरस्तीर्थमाराद् उत्क्षिप्याङ्के ज्योतिरेनां तिरोऽभूत्" इति शक्तेरुदाहरणमित्युक्तम्, तत्तु न युक्तम्, विरोधानपाकरणे विरोधिनो दूरस्थितिसम्पादनेऽपि

CC-0. Sampurnanand University Collection. Digitized by eGangotri

विरोधस्य स्थित्या विरोधप्रशमाभावात् । पुरोधसस्त्वयं प्रकारः समीपस्थयोरपि तयोर्विरोधप्रशमनरूप इत्यस्यैव शक्त्युदाहरणत्वं युक्तम् ।

प्रसङ्गनामकं विमर्शसन्ध्यङ्गं यथा शाकुन्तले पञ्चमाङ्कावसाने—"राजा

कामं प्रत्यादिष्टां स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानं प्रत्याययतीव मां हृदयम् ॥

अत्र हि मुनेस्तनयामिति गुरुकीर्तनम् । प्रसङ्गलक्षणं यथा दशरूपके—"गुरुकीर्तनं प्रसङ्गः" । एवमेव दर्पणेऽपि । यद्यपि नाट्यशास्त्रे "प्रसङ्गश्चैव विज्ञेयो वाक्यैरामर्षयोजितैः" इत्युक्तम्, तथापीदमपि वाक्यमस्त्यामर्षयोजितमिति नाट्यशास्त्रानुसारेणाप्यत्र प्रसङ्गः । तथाहि मुनेस्तनयामिति प्रत्यादेशे परिग्रहाभावे च हेतुत्वेनोपन्यस्तम् । यतो मुनेस्तनया, अतः पौरवस्याभिजातस्य मे कुतस्तस्याः परिग्रहत्वसम्भावनेति ।

खेदनामकं विमर्शसन्ध्यङ्गं यथा शाकुन्तले षष्ठाङ्के कञ्चुकिवाक्यम्—

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्योपान्तविवर्तनैर्विगमयत्युन्निद्र एव क्षपाः ।
दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीडावनम्रश्चिरम् ॥ इति ।

खेदलक्षणं दर्पणे—"मनश्चेष्टासमुत्पन्नः श्रमः खेद इति स्मृतः" । अत्र प्रथमपादे मनःसमुत्पन्नः श्रमः । इतरेषु त्रिषु पादेषु चेष्टासमुत्पन्नः । एवं तस्मिन्नेवाङ्केऽग्रे—

प्रत्यादिष्टविशेषमण्डनविधिर्वामप्रकोष्ठश्लथं
बिभ्रत्काञ्चनमेकमेव वलयं श्वासोपरक्ताधरः ।
चिन्ताजागरणप्रताम्रनयनस्तेजोगुणैरात्मनः
संस्कारोल्लिखितो महामणिरिव क्षीणोऽपि नालक्ष्यते ॥

इति पद्ये चेष्टासमुत्पन्नः श्रमः ।

प्रतिषेधाख्यं विमर्शसन्ध्यङ्गं यथा शाकुन्तले षष्ठेऽङ्के—"राजा—(ध्यानमन्दं परिक्रम्य)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रथमं सारङ्गाक्ष्या प्रियया प्रतिबोध्यमानमपि सुप्तम् ।
अनुशयदुःखायेदं हतहृदयं सम्प्रति विबुद्धम् ॥ इति ।

अत्र शकुन्तलाप्राप्तिरूपस्येप्सितार्थस्य प्रतीघातात् प्रतिषेधः । प्रतिषेधलक्षणं तु दर्पणे—"ईप्सितार्थप्रतीघातः प्रतिषेध इतीर्यते" इति ।

वस्तुतस्तु नेदं प्रतिषेधोदाहरणं साधु प्रतिभाति । यतः प्रतिषेधसंज्ञया प्रतिषेधमूलकस्यैवेप्सितार्थप्रतीघातस्य प्रतिषेधत्वं युज्यते । अत्र तु प्रतिषेधो न शब्दोपात्त इति नास्य प्रतिषेधोदाहरणत्वम् । एवञ्च—

साक्षात् प्रियामुपनतामपहाय पूर्वं
चित्रार्पितामहमिमां बहु मन्यमानः ।
स्रोतोवहां पथि निकामजलामतीत्य
जातः सखे प्रणयवान् मृगतृष्णिकायाम् ॥

इति प्रतिषेधोदाहरणं संभवति, अत्रापहायेत्यनेन प्रतिषेधस्योक्तप्रायत्वादिति ।

प्रतिषेधवद् विरोधमूलकं कार्यात्ययोपगमनमेव विरोधनम् । यथा वेणीसंहारे युधिष्ठिरः—

तीर्णे भीष्मपयोनिधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्ये च जाते दिवम् ।
भीमेन प्रियसाहसेन रभसादल्पावशेषे जये
सर्वे जीवितसंशयं वयममी वाचा समारोपिताः ॥

एवमेव विरोधनोदाहरणं यथा शाकुन्तले पञ्चमेऽङ्के राजवाक्यं तपस्विनः प्रति—"भोस्तपस्विनः । चिन्तयन्नपि न खलु स्वीकरणमत्रभवत्याः स्मरामि, तत्कथमिमामभिव्यक्तसत्त्वलक्षणामात्मानमक्षत्रियं मन्यमानः प्रतिपत्स्ये" इति । अत्राक्षत्रियमित्यपपाठः । क्षत्रियमित्येव पाठः साधीयान् । तथाहि—आत्मनि क्षत्रियत्वमतिर्ब्राह्मणकन्यायाः पूज्याया भार्यात्वेन प्रतिपत्त्यभावे हेतुः, विरोधात् । अत्रभवत्या इति विशेषणं पूज्यत्वावद्योतकम् । अतोऽत्र प्रागुक्तविरोधमूलकस्य शकुन्तलापरिणयाभावरूपकार्यात्ययस्य राजकर्तृकमुपगमनं (स्वीकारः) इति विरोधनम् । तल्लक्षणं तु दर्पणे—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"कार्यात्ययोपगमनं विरोधनमिति स्मृतम्" इति ।

विमर्शसन्ध्यङ्गं प्ररोचनोदाहरणं यथा शाकुन्तले षष्ठेऽङ्के विदूषकवाक्यं राजानं प्रति—"भोः ! मैवम्, नन्वङ्गुरीयकमेवात्र निदर्शनम्। अवश्यंभाविनोऽचिन्त्यसमागमा भवन्ति" इति। अत्र हि भाविन उपसंहारार्थस्य शकुन्तलासमागमरूपस्याङ्गुलीयकदर्शनेन सूचनात् प्ररोचना। प्ररोचनालक्षणं यथा साहित्यदर्पणे—

"प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी" इति ।

अत्र लक्ष्यबलाद् भावित्वं संहारार्थस्य विशेषणं ज्ञेयम्। अत एव दशरूपके प्ररोचना-लक्षणम्—

"सिद्धामन्त्रणतो भाविदर्शिका स्यात् प्ररोचना" इति ।

अत्रापि भावित्वमपि न सामान्यं किन्तु संहारार्थनिष्ठमेव दर्पणानुरोधादिति।

विमर्शसन्ध्यङ्गस्यादानस्योदाहरणं यथा शाकुन्तले षष्ठेऽङ्के मिश्रकेशीवाक्यम्—"किमिदानीमेव निवृत्तं करोमि ? अथवा श्रुतं मया शकुन्तलां समाश्वासयन्त्या देवजनन्या मुखात्—यज्ञभागसमुत्सुका देवा एव तथाऽनुष्ठास्यन्ति, यथा स भर्ता अचिरेण धर्मपत्नीं त्वामभिनन्दिष्यति"। अत्रानेन मिश्रकेशीवाक्येन भर्तृकर्तृकस्य शकुन्तलाकर्मकस्यानन्दनरूपस्य कार्यस्य समाप्तत्वेन (परिनिष्पन्नत्वेन) ग्रहणाद् (उपादानात्) आदानम्। तदुक्तं दर्पणे—"कार्यसंग्रह आदानम्" इति। दशरूपकेऽप्येवमेव। अत्रादानशब्दो विनाऽप्युपोपसर्गमुपादान-रूपमर्थं बोधयति, लक्षणानुगमादिति ।

विमर्शसन्ध्यङ्गं छादनं यथा शाकुन्तले पञ्चमेऽङ्के राजानं प्रति कण्वशिष्यस्य शार्ङ्गरवस्य वचनम्—"मा तावत्,

कृतावमर्षामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः ।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन ॥

इदं वाक्यं हि शकुन्तलास्वीकाररूपकार्यार्थं कण्वशिष्येण शार्ङ्गरवेणावमाननात् प्रयुक्त-मिति भवत्यत्र छादनम्। तदुक्तं नाट्यशास्त्रे—

"अवमानात् कृतं वाक्यं कार्यार्थं छादनं भवेत्" इति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

कार्यार्थमवमाननात् कृतं वाक्यं छादनं भवेदिति योजना। अत्र कृतमित्यस्य प्रयुक्त-मित्यर्थः, "कृभ्वस्तयः क्रियासामान्यवचनाः" इत्यभ्युपगमात्। साहित्यदर्पणे तु—

"कार्यार्थमपमानादेः सहनं खलु यद् भवेत्॥ तदाहुश्छादनं पुनः" इति।

एतस्य लक्षणस्य तु नेदं पद्यमुदाहरणम्। अत एतस्योदाहरणं तु "राजा—(कर्णौ पिधाय) शान्तं शान्तम्" इत्यारभ्य "तपोधनसंवर्धित एष जनोऽनभिज्ञः कैतवस्य" इत्यन्तो वाक्य-सन्दर्भो राजशकुन्तलागौतमीनां वाकोवाक्यरूपः। अत्र हि गौतमीशकुन्तलाभ्यां राजकृतस्याधि-क्षेपापमानादेः कार्यार्थे सहनमिति च्छादनम्। किन्त्विदं लक्षणं मुनिमतविरुद्धं कौतस्कुतमिति विचिन्त्यम्। वस्तुतस्तु छादनेऽस्ति वस्तुद्वयम्—तत्रैकं कार्यार्थमवमाननात् कृतं वाक्यं छादन-मिति, अपरं त्ववमाननवाक्यत्रोधिताधिक्षेपापमानादेः कार्यार्थे सहनमिति। तत्राद्यलक्षणे-ऽवमाननस्य प्राधान्यम्, द्वितीये त्वधिक्षेपादेः सहनस्येति मुनिलक्षणतोऽर्थात् प्राप्तस्यैव लक्षण-त्वमङ्गीकृतं दर्पणकृता। स्वलक्षणलक्ष्य एव चमत्कारातिशयः। मुनिना त्वर्थलभ्यत्वाद् एतन्न निर्दिष्टम्। अनेन तु न तस्य लक्षणस्यार्थाल्लाभः।

(सावशेषम्)

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सन्ध्याविमर्शः

श्री के० पी० नारायणशास्त्री, सरस्वतीभवनम्, वाराणसी।

(पूर्वाङ्कतोऽनुवृत्तिः)

सावित्र्यास्तु जपस्ताभ्यामेकोऽप्यानन्त्यमृच्छति।
गायत्र्या वेदबीजत्वात् पर्वभिश्च जपः स्मृतः॥
अनेन विधिना कुर्याद् जपयज्ञं प्रयत्नतः।
प्रपन्नो विपुलान् भोगान् भुक्तिं मुक्तिञ्च विन्दति॥

इति गौतमेन जपयज्ञस्य सर्वाभीष्टघटनापटीयस्त्वमाम्नायते।

जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्याद् मैत्रो ब्राह्मण उच्यते॥ इति मनुश्च।
जपात् श्रान्तः पुनर्ध्यायेद् ध्यानात् श्रान्तः पुनर्जपेत्।
जपध्यानाभियुक्तस्य नित्यं मन्त्रः प्रसिध्यति॥

इति जपध्यानयोः परस्परसापेक्षयोः सिद्धिप्रदत्वमुक्तम्। तथा च मन्त्रप्रतिपाद्यदेवतानुसन्धानसिद्धये मन्त्रार्थज्ञानमप्यवश्यमादरणीयम्।

भगवद्गीतासु च भगवान् श्रीयशोदाकिशोरो जपयज्ञं स्वविभूतिमध्ये पर्यजीगणत् "यज्ञानां जपयज्ञोऽस्मि" इति। कारणञ्च स्वयमाह—"अहिंसया च भूतानां जपयज्ञः प्रवर्तते" इति। अनेनैवाशयेन "कुर्यादन्यन्न वा कुर्यात्" इति मनुरप्याह।

इदानीं तुरीयगायत्रीजपप्रकारोऽभिधीयते। अस्य श्रीतुरीयगायत्रीमहामन्त्रस्याथर्वपुत्रो विमलर्षिः, अनुष्टुप्छन्दः, तृतीयगायत्री देवता, परो रजस इति बीजम्, असावद इति शक्तिः ओमिति कीलकं मम तुरीयगायत्रीदेवताप्रसादसिद्ध्यर्थे जपे विनियोगः।

१. पर इत्यङ्गुष्ठाभ्यां नमः।
२. रजसे तर्जनीभ्यां नमः।
३. असाविति मध्यमाभ्यां नमः।
४. अद इत्यनामिकाभ्यां नमः।
५. ॐ कनिष्ठिकाभ्यां नमः।
६. परो रजसेऽसावदों करतलकरपृष्ठाभ्यां नमः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

७. पर इति हृदयाय नमः ।

८. रजसे इति शिरसे स्वाहा ।

९. असाविति शिखायै वषट् ।

१०. अद इति कवचाय हुम् ।

११. ॐ नेत्रत्रयाय वौषट् ।

१२. परो रजसेऽसावदोम् अस्त्राय फट् भूर्भुवः सुवः ॐ इति दिग्बन्धः

ध्यानम्

यद्देवासुरपूजितारुणनिभं सोमार्कभासान्वितं
पुन्नागाम्बुजनागपुष्पबकुलैर्यासादिभिश्चार्चितम् ।
नित्यं ध्यानसमाधियोगकरणं कालाग्निरुद्रोपमं
तत्संहारकरं नमामि सततं पातालषष्ठं मुखम् ॥

इति ध्यात्वा मूलं गायत्रीजपदशांशं पञ्चपूजापूर्वकं जपेत् । उत्तरन्यासं पञ्चपूजान्तं कृत्वा जपं ब्रह्मार्पणं कुर्यादिति शिवम् । जपप्रकरणं समाप्तम् ।

अनन्तरकर्तव्यमाह भगवान् पितामहः—

एवं जप्त्वा यथाशक्ति उदिते तु दिवाकरे ।
उत्तमेत्यनुवाकेन चोद्वास्य च यथागतम् ॥
उपस्थानं स्वकैर्मन्त्रैरादित्यस्य तु कारयेत् ॥ इति ।

स्वकैः स्वस्वशाखोक्तमन्त्रैर्भगवत आदित्यस्योपस्थानं कार्यम् ।

"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्" इत्यर्थज्ञानहीननिन्दापुरस्सरम् "योऽर्थज्ञ इत् सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा" इत्यर्थज्ञानस्य फलविशेषविधानाभिधानादर्थो विव्रियते ।

तत्र प्रातरुपस्थानमन्त्रार्थः

मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिं सत्यं चित्रश्रवस्तमम् ॥ मित्रो जनान् यातयति प्रजानन् मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाभिचष्टे सत्याय हव्यं घृतवद् विधेम ॥ प्रसमित्रमर्तो अस्तु प्रयस्वान् यस्त आदित्यः शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमँहो अश्नोत्यन्तितो न दूरात् ॥ इति ।

मित्रस्येत्यत्र मित्रशब्देन आदित्यमण्डलान्तर्वर्ती परमात्मा बोध्यते, वक्ष्यमाणद्यावापृथिव्यादिविधारकत्वसर्वप्रेरकत्वादिधर्माणामन्वयस्वारस्यात् । चर्षणीधृत इत्यत्र चर्षणी-

CC-0. Sampurnanand University Collection. Digitized by eGangotri

शब्दो मनुष्यबोधकः। तेन सर्वप्राणिजातमुपलक्ष्यते। तथा च सर्वप्राणिजातस्य तत्तत्कर्मानुसारेण फलदानद्वारा धारयतीति चर्षणीधृत्। तस्य देवस्य स्वयं प्रकाशस्वरूपस्य श्रवः सत्यकामत्व-सत्यसङ्कल्पत्वादिरूपं यश इत्यर्थः। सानसिं भजनीयम्, सत्यम् = अबाधितम् चित्रश्रव-स्तमम् आश्चर्यकरव्यापारानुबन्धितया श्राव्यतमम्, स्मराम इति शेषः।

मित्रः = परमात्मा जनान् = प्राणिनः, प्रजानन् तत्तत्प्राणिकर्मस्वरूपं प्रकर्षेण जानन्, सर्वान्तर्यामिणः सर्वसाक्षिणश्च सर्वविषयकज्ञानसत्त्वेन पूर्वपूर्वानेकजन्मानुष्ठितपुण्यपाप-कर्मजातस्यासंख्यस्य ज्ञानं सम्भवतीति प्रकर्षेणेत्युक्तम्। यातयति तत्तत्प्राणिकर्मानुसारेण प्रेरयति। एतेन न परमेश्वरस्य वैषम्यनैर्घृण्यदोषप्रसक्तिरिति ज्ञेयम्, कर्मसापेक्षत्वात्। तथा च पारमर्षं सूत्रम्—"वैषम्यनैर्घृण्ये न सापेक्षत्वात्" इति। मित्रः पृथिवीम् उत अपि द्याम्। उपलक्षणमेतत्। कृत्स्नस्य जगतः परमात्मा द्यावापृथिव्यादिसकलं जगद् धारयतीत्यर्थः। तथा च वाजसनेयके—"एतस्य वाऽक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, एतस्य वाऽक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्दन्ते प्रतीच्योऽन्याः" इत्यादि सविस्तरमाम्नायते। "यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः" इत्याथर्वणे च। मित्रः परमात्मा, कृष्टीः पुण्यपापकारिणीः प्रजाः, अनिमिषा निमेषरहितेन नित्यज्ञानरूपचक्षुषा, अभिचष्टे साक्षात् पश्यति, सकलजगत्कर्मसाक्षीति यावत्। सत्याय त्रिकालाबाधित-स्वरूपाय, घृतवत् हव्यं गव्येनाज्येन सिक्तं हव्यं चरुं विधेम = दद्म इत्यर्थः। हे मित्र सः मर्त्यः प्रयस्वान् अन्नादिसम्प्रयुक्तः। अस्तु। कः? यः मर्त्यः, ते तुभ्यं व्रतेन नित्यनैमित्तिककर्मणा युक्तः शिक्षति = हविर्ददाति, त्वोतः = त्वया रक्षितः केनापि न हन्यते। न जीयते सपत्नैरन्यैर्वा वादिभिः, शतवर्षसंख्याकपुरुषायुषं यावत् सर्वविधं सुखमप्यनुभवति, त्वया रक्षितमप्येनम् अन्तितः इह जन्मनि कृतं दूरात् जन्मान्तरे कृतञ्च, अंहः पापं नाश्नोति—न प्राप्नोति, पापसंस्पर्शलेशरहितो यावत्पुरुषायुषं सुखीभवतीति भाव इति प्रातरुपस्थानमन्त्रार्थः।

अथ माध्याह्निकोपस्थानमन्त्रार्थः

आ सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्॥ १॥

देवः सविता द्योतनात्मकः स्वयंप्रकाशः सवितृमण्डलमध्यवर्ती परमात्मा सत्येन रजसा ज्योतिःस्वरूपेण आवर्तमानः अमृतं मर्त्यञ्च देवान् मनुष्यांश्च निवेशयन् स्वस्वव्यापारे प्रवर्तयन् हिरण्ययेन रथेन युक्तः भुवनानि पश्यन् आयाति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् ।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।। २ ।।

वयं तमसः = अज्ञानान्धकारस्योपरि स्थितं मायातीतमिति यावत् । उत्तरं ज्योतिः ज्योतिषामपि ज्योतिः परमात्मस्वरूपम् "तद्देवा ज्योतिषां ज्योतिः" इति श्रुतेः । देवम् = स्वप्रकाशम् , सूर्यम् = सर्वप्राणिप्रेरकम् , उत्तमं ज्योतिः, अगन्म तदात्मतया ध्यानात् तन्मयतया स्थास्याम इत्यर्थः ।

उदु त्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ।। ३ ।।

उत्–उ–त्यम् इतिच्छेदः । जातवेदसं सर्वज्ञं देवं स्वप्रकाशं त्यम् = तमित्यर्थः, केतवः = सहस्रसंख्यारश्मयः, विश्वाय = विश्वस्य, दृशे = दर्शनाय, उद्वहन्ति = उद्गमयन्तीत्यर्थः ।

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षँ सूर्य आत्मा जगतस्तस्थुषश्च ।। ४ ।।

चित्रम् = नानाविधं देवानामनीकम् = सैन्यं प्रविष्टं सत् दैत्ययुद्धे देवानां जयप्रदं तदेव ब्रह्म, उदगात् तेषामग्रे प्रादुरभूत् । परमेश्वरो यक्षरूपेण प्रादुर्भूय देवाननुजग्राहेति केनोपनिषदि देवीभागवते द्वादशस्कन्धे चोक्तम् । मित्रस्य वरुणस्याग्नेरिति सर्वेषामेव देवानां चक्षुः = प्रकाशकम्, "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतेः । द्यावापृथिवी अन्तरिक्षमुपलक्षकतया सर्वान् लोकान् आप्राः = पूरयतीत्यर्थः । जगतस्तस्थुषश्च स्थावरजङ्गमात्मकसर्वप्रपञ्चस्य सूर्यः = अन्तर्यामी परमात्मस्वरूप इत्यर्थः ।

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ।। ५ ।।

तद् ब्रह्म चक्षुः सर्वावभासकम्, देवहितम् असुरविजयपूर्वकं देवानां हितम् = जयप्रदम् , शुक्रम् = शुद्धम् , पुरस्तात् = पूर्वदिशि सूर्यरूपेणोद्गच्छति, सकलप्राणिनां स्वरूपदर्शनप्रदानेनानुग्रहकारि, नहि कैलासाद्रिवासिनं भगवन्तं परमेश्वरमञ्जसा सर्वे द्रष्टुं प्रभवेयुः ।

उतैनं गोपा अदृशन् अदृशन्नुदहार्यः ।
उतैनं विश्वा भूतानि स दृष्टो मृडयातिनः ।।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति मन्त्रे चायमर्थः स्फुटः। अजाविपालादयोऽप्युदकुम्भदास्योऽपि। किं बहुना, विश्वानि प्राणिजातानि एनं सूर्यरूपेणोद्गच्छन्तं परमेश्वरं कैलासवासिनमपरिमिततपःशक्तियुक्तैरपि दुर्दर्शं दर्शनमात्रेण सकलपापेन्धनदवानलं सर्वविधसुखानुभवहेतुं चर्मचक्षुषा पश्यन्तीति परकारुणिकस्य सर्वानुजिघृक्षया सूर्यरूपेण प्रादुर्भूय दर्शनप्रदानमिति भावः। तादृशं सूर्यरूपेण प्रादुर्भूतं परमेश्वरं पश्येम शरदः शतं शतं पुरुषायुषम् आन्ध्यादिरहिताः पश्येमेत्यर्थः। तत्साक्षात्काराय सर्वसम्प्रयुक्ता जीवेम शरदः शतम्। तदनुग्रहेण तत्पुत्रशिष्यादिसकलपरिवारयुक्ता नन्दाम शरदः शतम्। तैः सह नीरोगदृढगात्राः प्रकृष्टानन्दमनुभवेमेत्याह—मोदाम शरदः शतमिति। परमात्मानुग्रहपात्रं भवाम शरदः शतम्। मोक्षोपयोगिमहावाक्यार्थं गुरुमुखात् शृणवाम शरदः शतम्। सच्छिष्यान् प्रति तत्त्वमस्यादिमहावाक्यार्थं प्रब्रवाम शरदः शतम्। वेदान्तविरुद्धार्थवादिशुष्कतार्किकैरन्यैरपि शत्रुभिरपराजिता वर्षशतं स्यामेत्याह—अजिताः स्याम शरदः शतमिति। ज्योक् च सूर्यं दृशे चिरकालं सूर्यान्तरवस्थितं परमात्मानं पश्याम इत्यर्थः।

य उदगान्महतोऽर्णवाद् विभ्राजमानः सरिरस्य मध्यात्।
स मां वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु॥ इति मन्त्रः।

यो महतोऽर्णवात् सलिलस्य मध्याद् विशेषेण भ्राजमानः=दीप्यमानः, सन्नुदगात् स वृषभः सर्वकामवर्षी परमेश्वरः, लोहिताक्षः = रक्तपङ्कजसमानविलोचनः, "तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी" इतिच्छन्दोगश्रुतेः। विपश्चित् सर्वज्ञः सूर्यान्तर्यामी मनसा सङ्कल्पमात्रेण मां पुनातु स्वस्वरूपप्राप्तियोग्यं करोतु। इति मन्त्रार्थः।

अथ सायमुपस्थानमन्त्रार्थः

इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥ १॥

हे वरुण इमं मे हवम् = त्वं श्रुधि=शृणु। अद्या च=इदानीमेव त्वं श्रुत्वा मां मृडय=सुखिनं कुरु। अवस्युः=आत्मरक्षणकामः, अहं त्वाम् आचके=प्रार्थये।

तत् त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युः शँ समान आयुः प्रमोषीः॥ २॥

तत् तदर्थं त्वा=त्वां ब्रह्मणा स्तोत्रेण वन्दमानः स्तुवन् यामि शरणमिति शेषः। "यजमानो मद्रूपेण नरपशुना यागाय प्रवृत्तो हरिश्चन्द्रः" इति शुनःशेपस्य वचनं वरुणं प्रति। हविर्भिः=मच्छरीरमयैस्तद्यागफलम् आशास्ते प्रार्थयते, हे उरुशंस बहुयजमानैः बहुषु

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यागकर्मसु स्तुत। हे वरुण अहेडमानः=अक्रुध्यन् इहास्मिन् यागे बोधि=मम विज्ञप्तिं जानीहि। नः=अस्माकम्, आयुः मा प्रमोषीः मापहासीरित्यर्थः। यजमानो हरिश्चन्द्रो यागफलं लभतामहमपि दीर्घायुर्जीवेयमिति प्रार्थनातात्पर्यम्।

यच्चिद्धिते विशो यथा प्रदेव वरुणव्रतम्। मिनीमसि द्यवि द्यवि ॥ ३ ॥

हे देव वरुण! विशः अविवेकिनो जनाः, ते व्रतं त्वामुद्दिश्य क्रियमाणं यथा नाशयन्ति तथा वयमपि द्यवि द्यवि=दिने दिने मिनीमसि=तव कर्माणि नाशयामः। 'चित् हि' इति निपातावनर्थकौ—

यत् किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहे मनुष्याश्चरामसि।
अचित्ती यत् तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥ ४ ॥

किञ्च, हे वरुण वयमविवेकिनो मनुष्या दैव्ये जने=देवसमूहविषये यत्किञ्चिद् अभिद्रोहम्=अपचारं चरामसि=आचरामः, अचित्ती=अविवेकिनो वयं यत् तव धर्मा युयोपिम यत्किञ्चिद् धर्मकार्यं नाशितवन्तः, हे देव। तस्मादेनसः=सर्वविधादपि पापात्, नः मा रीरिषः=मा हिंसीः। सर्वेऽपराधाः क्षन्तव्या इति शुनःशेपप्रार्थना।

कितवासो यद् रिरिपुर्नदीवि यद्वाघा सत्यमुत यन्न विद्मः।
सर्वा ता निष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः ॥ ५ ॥

कितवासः=धूर्ताः, नदीवि=देवनस्थानेव यत् पापं रिरिपुः अस्मासु आरोपयन्ति, 'यद्वाघा' इति समुदाय एवार्थकः। सत्यम्=सत्यमेव, उत=असत्यमपि यत् न विद्मः वयं यद्यपि न जानीमः, यथा देवनस्थाने परस्परं सत्यमसत्यमपि वदन्ति दोषांश्चारोपयन्ति तद्वत्, सर्वा ता सर्वाणि तानि शिथिरेव शिथिलानीव निष्य अपनय। अथ हे वरुण! वयं तव प्रियाश्च स्याम त्वया सकलपापविमोचने कृते वयं शुद्धान्तःकरणास्तत्त्वमस्यादिमहावाक्यार्थज्ञानं संपादयेम ज्ञानिनश्च तवात्यन्तं प्रिया वयं यथा तादृशा भवेम तथानुग्रहाणेति प्रार्थनातात्पर्यम्। इत्युपस्थानमन्त्रार्थः।

उपस्थानानन्तरकरणीयमाह भगवान् भरद्वाजः—

उपस्थाय नमस्कुर्यात् चतुःसन्ध्यादिदेवताः।
सन्ध्या पुरस्तात् सावित्री गायत्री च सरस्वती ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

एताः सन्ध्यादयः प्रोक्ताश्चतस्रो देवताः क्रमात् ।
स्वस्वनामचतुर्थ्यन्तं प्रणवादिनमोऽन्तकम् ॥
मन्त्रमासामिह प्रोक्तं प्रणमेत् स्वस्वमन्त्रतः ।
सर्वाभ्यो देवताभ्यश्चेत्येतत् प्रणवसम्पुटम् ॥
उक्त्वा नमो नम इति प्रणमेत् सर्वदेवताः ।
कामोऽकार्षीन्मन्युरकार्षीन्नमो नम इत्यपि ॥
उक्त्वा प्रदक्षिणेनैव देवीं विप्रोऽभिवादयेत् ।
कर्णयुग्मं स्वहस्ताभ्यां स्पृष्ट्वा जानुद्वयादिकम् ॥
चरणाङ्गुष्ठपर्यन्तं सम्मृज्य तु शनैः शनैः ।
अभिवाद्य तु गायत्रीं नमस्कुर्याद् दिशस्तथा ॥
प्राची च दक्षिणा चैव प्रतीची चोत्तरोर्ध्वगाः ।
अधरा चान्तरिक्षं च भूमिश्चाष्टोदिता दिशः ॥
एतां प्रदक्षिणेनैव प्रणमेत् स्वस्वमन्त्रतः ।
यमविष्णुविरूपाक्षसवितॄणमुपस्थितिम् ॥
कुर्यात् तल्लिङ्गकैर्मन्त्रैर्दिशो याम्यादिदिङ्मुखः ।

इत्युक्तक्रमेण गायत्र्यादिदेवतादिग्देवतायमविष्णुविरूपाक्षसवितृदेवताश्चोपस्थेयाः ।

एवमुपस्थानस्य फलविशेषमाह भगवानाम्नायः—"स एवमेवाहरहरहोरात्रयोः सन्धिमुपतिष्ठमानो ब्रह्मभूतो ब्रह्मलोकमभिजयति" इति । इत्युपस्थानप्रकरणम् ।

पुराणादिष्वनेकसहस्रवर्षजीवित्वमृषीणां यदुच्यते, तत्रेदमेव सन्ध्योपासनं निमित्तमित्याह—

ऋषयो दीर्घसन्ध्यत्वाद् दीर्घमायुरवाप्नुयुः ।
सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥

इति सन्ततसन्ध्योपासनव्रतपरायणानां समस्तपापराशिविधूननपूर्वकब्रह्मलोकप्राप्तिरूपमहाफलप्राप्तिरभिधीयते ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सन्ध्योपासनाकरणे निन्दाप्रत्यवायादिप्रतिपादकानि च प्रमाणानि भूयांस्युपलभ्यन्ते। तथाहि—

धिगस्तु जन्म तेषां वै कृतघ्नानां तु पापिनाम्।
ये सर्वमातरं देवीं स्वोपास्यां न भजन्ति हि॥ इति निन्दा।

अकरणे प्रत्यवायमाह भगवान् गोभिलः—

सन्ध्या येन न विज्ञाता सन्ध्या येनानुपासिता।
जीवमानो भवेत् शूद्रः मृतः श्वा चाभिजायते॥ इति।
ब्रह्मणो हृदयं विष्णुः विष्णोश्च हृदयं शिवः।
शिवस्य हृदयं सन्ध्या तेनोपास्या द्विजातिभिः॥ इत्युक्त्वा,
योऽन्यत्र कुरुते यत्नं धर्मकार्येष्वपि द्विजः।
विहाय सन्ध्याप्रणतिं स याति नरकायुतम्॥

इत्यन्यत्र धर्मकार्येषु प्रवृत्तिरपि प्रत्यवायकरीत्याह भगवान् कश्यपः।

बोधायनस्तु—

सायं प्रातः सदा सन्ध्यां ये विप्रा नो उपासते।
कामं तान् धार्मिको राजा शूद्रकर्मसु योजयेत्॥

इति राज्ञापि तेऽवश्यं दण्डनीया इति प्रतिपादयति।

या सन्ध्या सा जगत्सूतिर्मायातीता सुनिष्फला।
ऐश्वरी केवला शक्तिः मूर्तित्रयसमुद्भवा॥
तस्मात् सर्वप्रयत्नेन सन्ध्योपासनमाचरेत्।
उपासितो भवेत् तेन देवो योगतनुः परः॥
यः सन्ध्यां कालतः प्राप्तामालस्यादतिवर्तते।
सूर्यहत्यामवाप्नोति उलूकत्वमियात् ततः॥

इत्यादिप्रमाणसहस्रैरकरणे प्रत्यवायप्रतिपादकैरन्यद् धर्मकार्यमपि परित्यज्य सन्ध्योपास्तेरवश्यकर्तव्यतायाः प्रतिपादनात्—

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।
यदन्यत् कुरुते कर्म न तस्य फलभाग् भवेत्॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्यादिभिर्नित्याशुचित्वसर्वकर्मानर्हत्वतदितरधर्मकर्मनिष्फलत्वादिप्रतिपादकैश्च शास्त्रवचनैरिदं सुनिष्पन्नं यत् स्वकाले सन्ध्योपासनमेवावश्यमनुष्ठेयं नान्यद् धर्मकार्यमपीति किमु वक्तव्यमन्यस्य लौकिककर्मणः। अतोऽप्रमत्तैर्भगवती सन्ध्या नित्यमवश्यमुपास्येति सिद्धम्।

"अनुसन्ध्यमुपासीत सन्ध्यारूपं रविं द्विजः" इत्युक्तम्। अननुष्ठाने "सूर्यहत्यामवाप्नोति" इति च। अत्रेयमाशङ्का समुन्मिषति—सन्ध्यायाः स्त्रीदेवतात्वेनादित्यस्य तद्रूपत्वमनुपपन्नमिति। अत्राह—

पुंरूपं वा स्मरेद् देवि स्त्रीरूपं वा विचिन्तयेत्।
अथवा निष्कलं ध्यायेत् सच्चिदानन्दलक्षणम्॥
या सन्ध्या सा जगत्सूतिर्मायातीता सुनिष्कला।

इत्यादि प्रमाणानुसारेण मायातीताखण्डाद्वितीयसच्चिदानन्दघनब्रह्मस्वरूपेणोपासनस्यैव "असावादित्यो ब्रह्म" इति "ब्रह्मैव सन् ब्रह्माप्येति" इति श्रुतिप्रतिपादितप्रकारेण सन्ध्योपासनत्वमिति न काप्यनुपपत्तिः।

अत्राह—ब्रह्मविष्णुरुद्राद्यनेकदेवताविषयकानेकविधगायत्रीमध्ये सवितृदेवताकगायत्र्या एव प्राधान्येनोपास्यत्वे किं नियामकमिति? सकललोकयात्रानिर्वाहकत्वादिति ब्रूमः। तथाहि तैत्तिरीयोपनिषदि—"याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्रजायन्ते ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शान्तिः शान्त्या चित्तं चित्तेन स्मृतिः स्मृत्या स्मारं स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं ददत् सर्वाण्येतानि ददाति" इति।

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥

इति स्मृतिश्चैतमाशयमावेदयति। श्रीमद्भागवते च द्वादशस्कन्धे—"ओं नमो भगवते आदित्यायाखिलजगदात्मस्वरूपेण कालस्वरूपेण चतुर्विधभूतनिकायानां ब्रह्मादिस्तम्बपर्यन्तानामन्तर्हृदयेषु बहिश्चाकाश एवोपाधिनाऽव्यवधीयमानो भगवानेक एव क्षणलवनिमेषावयवोपचितसंवत्सरगणेनापामादानविसर्गाभ्यामिमां लोकयात्रामनुवहति।" इति सकललोकयात्रानिर्वाहकत्वं स्पष्टमभिहितं भगवतो विवस्वतः—

तत्रैहिकयात्रानिर्वाहकत्वं तैत्तिरीये यथा सम्यग् विवृतम्, यथा छान्दोग्ये मधुविद्यायाम्—

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"असौ वा आदित्यो देवमधु" इत्यादिना पारत्रिकयात्रानिर्वाहकत्वमप्यभ्यधायि। तत्र हि "तस्यादित्यस्य ये प्राञ्चो रश्मयः, येऽस्य दक्षिणा रश्मयः येऽस्य प्रत्यञ्चो रश्मयः, येऽस्योदञ्चो रश्मयः, येऽस्योर्ध्वा रश्मयः" इति पञ्चधा प्रविभक्तरश्मिभिस्तत्तद्वेदमन्त्रोच्चारणपूर्वकमग्नौ प्रास्ताहुतीनाममृतभावप्राप्तिमाम्नाय "तद् यत् प्रथमममृतं तद्वसव उपजीवन्ति, अथ यद् द्वितीयममृतं तद् रुद्रा उपजीवन्ति, अथ यत् तृतीयममृतं तदादित्या उपजीवन्ति, यच्चतुर्थममृतं तन्मरुत उपजीवन्ति, अथ यत् पञ्चमममृतं तत् साध्या उपजीवन्ति" इति तत्तद्दिग्वर्त्तिरश्मिनिकरसम्पादितामृतोपजीवित्वं वसुरुद्रादित्यमरुत्साध्यदेवगणानामभिहितमेतेन च तस्मादितः प्रदानं देवा उपजीवन्तीति श्रुत्युक्तार्थः स्पष्टं विवृतः। अमुतः प्रदानं मनुष्या उपजीवन्तीति श्रुत्यर्थश्च पूर्वोक्ततैत्तिरीये विवृत इति सकललोकयात्रानिर्वाहकत्वमनया परिपाट्या विज्ञेयम्। "प्रत्यक्षो भगवान् विष्णुर्येन विश्वं प्रतिष्ठितम्" इति भगवदुक्त्या जगच्चक्षूरूपस्य भगवतो भास्वतः प्रत्यक्षमेव विश्वप्रतिष्ठाहेतुत्वमिति सवितृदेवताकगायत्र्या इतरगायत्र्यपेक्षया वैशिष्ट्यमखिलप्रमाणगणपरिगणितमनपह्नवनीयम्। देवीभागवते द्वादशस्कन्धे गायत्रीं परदेवतामुपासीनस्य भगवतो गौतमस्य परस्सहस्त्रविप्रकुटुम्बमतिदुर्भिक्षपरिपीडितमभीष्टसकलविधभोगदानेनानेकवर्षकालपरिरक्षणमपि श्रीभगवत्या गायत्र्याः प्रसादद्वारैवेति स्पष्टमुपाख्यायते। भगवत्या गायत्र्याः प्रसादेनैव भगवान् वसिष्ठो विश्वामित्रप्रयुक्तानेकास्त्रवर्षाणि ब्रह्मदण्डं निक्षिप्य कवलीचकार। "वसिष्ठो जपतां वरः" इति च क्रियासमभिहारेण भगवान् वाल्मीकिरपि वसिष्ठं महीकरोति। विश्वामित्रेणापि ब्राह्मण्यमतिदुर्लभं सम्पादितम्। प्रत्यक्षस्य भगवतः सवितुरुपासनया श्रीरामेणापि रावणो युधि संहृतः। महाभारते युधिष्ठिरेण च सवितुरनुग्रहादेवाक्षयपात्रमुपलब्धम्। श्रीकृष्णस्यौरसात्मजः साम्बः सवितुः प्रसादेन स्वीयमहारोगं निराचकार। भगवान् याज्ञवल्क्यो गुरुतिरस्कृतः शुक्लानि यजूंषि प्रपेदे। अतस्त्रयीमयस्य त्रिमूर्तिरूपस्य सकलजगत्सृष्टिस्थितिसंहारकारणस्य भगवतो विवस्वतो गायत्री सकलपुरुषार्थघटनापटीयसी निरन्तरं सर्वैरुपास्येति निश्प्रचम्।

यत्तु निशीथे तुरीयसन्ध्यायां जप्त्वा वाक्सिद्धिर्भवतीति देव्यथर्वशीर्षवचनेन तुरीयसन्ध्योपासनप्रस्तावोत्थानं तत्त्रिकालसन्ध्याया वैदिक्या उपास्तिमपि कर्तुमलसानामाधुनिकानां नात्यन्तोपयोगीति नेह प्रतायते विस्तरभयादित्यन्यत्र लेखनीं व्यापारयामः।

यच्च—

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्।
यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम्॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति मन्त्रेण त्रिपुण्ड्रधारणमुक्त्वा त्र्यायुषशब्दस्य पद्मपुराणोक्तरीत्या जमदग्न्यादिमहर्षीणां पुरुषायुषत्रयजीवनहेतुत्वेन भस्मवाचकत्वम् (३०।९।६३) महाप्रदोषप्रवचनवेलायामुपक्षिप्य जमदग्न्यादिमहर्षिवाचकत्वं जमदग्न्यादिशब्दानां प्रस्तुतमासीत्, तत्रायमाक्षेपः—महर्षिवाचकतायामभ्युपगम्यमानायां वेदस्य तादृशमहर्षिजन्मोत्तरभावितयाऽनित्यत्वापादकतयाऽपौरुषेयत्वसिद्धान्तविरोध इति । तत्रेदं समाधानम्—"अस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदः" इत्यादिना भगवन्निःश्वसितरूपेणाविर्भावकथनात् कालिदासादिवदर्थं बुद्ध्वा शब्दरचनामन्तरेणानायासेन निःश्वसितवदाविर्भावस्य पौरुषेयत्वानापादकत्वाद् देवताधिकरणोक्तरीत्या जमदग्न्यादिशब्दानां जातिवाचकत्वाङ्गीकारान्न शब्दनित्यत्वविरोध इति । अत एव च नित्यत्वमिति भगवता बादरायणेन नित्यत्वस्य समर्थितत्वाच्च । तथाहि—देवताधिकरणे इन्द्रादीनां विग्रहवत्त्वाङ्गीकारे शब्द इति चेदिति सूत्रेण वेदशब्दानित्यत्वशङ्कायामवतीर्णायां जातिशक्तिमङ्गीकृत्येन्द्रत्वादिजातिवाचकत्वान्नित्यस्य शब्दस्य नित्येनार्थेन यो नित्यः सम्बन्धः प्रथमे तन्त्रे ऊरीकृतस्तस्य न कापि हानिरिति सिद्धान्तितम् । अत एव च नित्यत्वमिति । तदुत्तरसूत्रेण चैवमेव नित्यत्वं प्रतिष्ठापितम् ।

एवञ्च "विश्वामित्रजमदग्नी वसिष्ठेनास्पर्धेताम् । जनको ह वै वैदेह आसाञ्चक्रे । जमदग्निपुष्टिकामश्चतूरात्रेणायजात । अत्रिरददादौर्वाय प्रजाम् । प्रजापतिर्वरुणायाश्वमनयत् । वसिष्ठो ह त पुत्रोऽकामयत । गावो वै समासत" इत्यादिबहुप्रकरणेषु शब्दानित्यत्वदोषपरिहारः सुलभसम्पाद्य इति न कोऽपि दोषः ।

किञ्च, शुचिः कर्माणि कुर्वीतेति व्याख्यानवेलायां कर्मणा शुद्धिः शुद्धौ च कर्माणीत्यन्योन्याश्रयोद्भावनमपि यदकारि तत् सन्ध्याकर्मणा शुद्धिं सम्पाद्य सन्ध्यानुष्ठेयेत्यवचनेनैव पराहतम् । स्नानेन शुद्धिं सम्पाद्य सन्ध्यादिनित्यकर्मानुष्ठेयमित्येव प्रकृतत्वात् तच्चोद्यं डिम्भविलसितमकाण्डताण्डवायितम् ।

श्रीमद्रामायणे विश्वामित्रेण रामं प्रति—

कौसल्या सुप्रजा राम ! पूर्वसन्ध्या प्रवर्तते ।
उत्तिष्ठ नरशार्दूल कर्तव्यं विधिचोदितम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इत्यभ्यधायि । महाभारते च—

ते तथैव महाराज दंशिता रणमूर्धनि ।
सन्ध्यागतं सहस्रांशुमादित्यमुपतस्थिरे ॥

इति महावीरसम्मर्दसंरम्भवेलायामपि सन्ध्योपासनस्यापरित्यागवचनात् पद्मपुराणे उत्तरभागे बिल्वेश्वरमाहात्म्ये भगवता वासुदेवेन माध्याह्निकस्नानपूर्वकं सन्ध्योपास्तिवेलायां संशयानैर्मार्कण्डेयादिभिर्भगवत एव सर्वोपास्यत्वेन भगवान् कमन्यमुपासीतेति प्रश्ने उत्तर-वेलायाम्—

मार्कण्डेयमुखाः सर्वे माध्याह्निकक्रियोत्थिताः ।
कृष्णः स्नानमथो चक्रे मृदक्षतकुशादिभिः ।
पीताम्बरं त्रिपुण्ड्रं च धृत्वा रुद्राक्षमालिकाम् ।
सूर्योपस्थानं सन्ध्यां च स्मृतिधर्ममनुस्मरन् ॥

इत्यादिना ।

शिवपूजां ततः कृष्णो गन्धपुष्पाक्षतादिभिः ।
चकार विधिवद् भक्त्या नमस्कारयुतां शुभाम् ॥
जय शङ्कर सोमेति रक्ष रक्षेति चाब्रवीत् ।

इत्याद्युक्त्वा—

त्वं विष्णुः कमलाकान्तः परमात्मा जगद्गुरुः ।
भवत्पूज्यः कथं शम्भुरेतत् सर्वं वदस्व मे ॥

इति मार्कण्डेयप्रश्नमुपक्षिप्य—

साधु साधु मुने पृष्टं हिताय सकलस्य च ।
अज्ञातं तव नास्त्येव तथापि च वदाम्यहम् ॥
दैवतं सर्वलोकानां सर्वकारणकारणम् ।
ज्योतिर्यत् परमानन्दं सावधानमनाः शृणु ॥
विश्वसाधनमीशानं गुणातीतमजं परम् ।
जगतस्तस्थुषो ह्यात्मा मम मूलं महामुने ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

यो देवः सर्वदेवानां ध्येयः पूज्यः सदाशिवः ।
स शिवः स महादेवः शङ्करश्च निरञ्जनः ॥
तस्मान्नान्यः परो देवस्त्रिषु लोकेषु विद्यते ।
तस्मिन् भक्तिर्महादेवे मम धातुश्च निर्मला ॥
वामाङ्गादभवं तस्य सोऽहं विष्णुरिति स्मृतः ।
जनयामास धातारं दक्षिणाङ्गात् सदाशिवः ॥

इत्यादि प्रतिवचनं दत्तम् ।

अत्र "जगतस्तस्थुषो ह्यात्मा मम मूलं महामुने" इत्यनेन भगवतो वासुदेवस्यापि मूलभूतं परमशिवात्मकं तत्त्वम्, तस्यैवादित्यान्तरवस्थितत्वं पूर्वमुक्तम्। "सूर्य आत्मा जगतस्तस्थुषश्च" इत्यत्रापि समस्तचराचरान्तर्वर्तित्वं सूर्यशब्देन तस्यैवोक्तं भवतीति मैत्रायणीयोपनिषद्विवरणे भर्गशब्दव्याख्यानेन पूर्वमेवोक्तम् । तथा च स्वस्याप्यन्तरात्मनः परमशिवस्य स्वात्मभूतस्यानुपासने स्वस्यैवावस्थितिर्नास्तीति वदन् भगवान् "वर्त एव च कर्मणि" इति गीतायामप्यमुमेवाशयं प्रकटीचकार ।

अथ विधिमवसाय्य शास्त्रदृष्टं
दिवसमुखोचितमञ्चिताक्षिपक्ष्मा ।
कुशलविरचितानुकूलवेषः
क्षितिपसमाजमगात् स्वयंवरस्थम् ॥

इति ब्रुवन् कालिदासः स्वयंवराय प्रस्थितो रघुचक्रवर्तितनूजन्मा श्रीमानजमहाराजो दिवसमुखोचितं शास्त्रदृष्टं विधिमवसाय्य स्वयंवरमण्डपं प्रतस्थ इति सन्ध्यायाः सार्वभौमानुष्ठानप्रकटनेनावश्यकर्तव्यतां स्पष्टयति ।

एवञ्च रामयुधिष्ठिरादिसार्वभौमैर्ब्रह्मविष्णुशङ्करादिदेवगणैर्नारदादिदेवर्षिभिर्वसिष्ठमार्कण्डेयादिब्रह्मर्षिभिः सर्वसम्मतपूजनीयतायामवश्यानुष्ठेयतायां च सम्पन्नायां किमु वक्तव्यमस्माभिरनुष्ठेयमिति । तस्मादुपक्रमे यदभ्यधायि श्रीमद्भिस्तत्र भवद्भिर्वाराणसेयसंस्कृतविश्वविद्यालयोपकुलपतिमहाशयैः—

विप्रो वृक्षस्तस्य मूलं हि सन्ध्या
वेदाः शाखाः सर्वकर्माणि पत्रम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तस्मान्मूलं यत्नतो रक्षणीयं
छिन्ने मूले नैव शाखा न वृक्षः ॥

इति तदतितरां साधूक्तमिति ।

किञ्च,

व्याघ्रीवास्ते जरा चायुर्याति भिन्नघटाम्बुवत् ।
निघ्नन्ति रिपुवद् रोगास्तस्मात् श्रेयः समाचरेत् ॥
यावन्नाश्रयते दुःखं यावन्नायान्ति चापदः ।
यावन्नेन्द्रियवैकल्यं तावच्छ्रेयः समाचरेत् ॥
कालो न ज्ञायते नानाकार्यैः संसारसम्भवैः ।
सुखदुःखरतो जन्तुर्न वेत्ति हितमात्मनः ॥
जडानार्त्तान् मृतान् आपद्गतान् दृष्ट्वाऽतिदुःखितान् ।
लोको मोहसुरां पीत्वा न बिभेति कदाचन ॥
सम्पदः स्वप्नसङ्काशा यौवनं कुसुमोपमम् ।
तडिच्चञ्चलमायुष्यं कस्य स्याद् जानतो धृतिः ॥
शतं जीवितमत्यल्पं निद्रा स्यादर्धहारिणी ।
बाल्यरोगजरादुःखैरर्धं तदपि निष्फलम् ॥
तोयफेनसमे देहे जीवे शकुनिवत् स्थिते ।
अनित्येऽप्रियसंसारे कथं तिष्ठन्ति निर्भयाः ॥
पृथिवी दह्यते येन मेरुश्चापि विशीर्यते ।
शुष्यते सागरजलं शरीरे तात ! का कथा ॥
अपत्यं मे कलत्रं मे धनं मे बान्धवाश्च मे ।
जल्पन्तमिति मर्त्याजं हन्ति कालवृको बलात् ॥

तस्मात्—

श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
नहि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सन्ध्याविमर्शः

अतः सर्वान् सहृदयान् सप्रश्रयं साञ्जलिबन्धं सादरं चेदमभ्यर्थये यदुपकुलपतिमहाभागैरुपक्रमे उपस्थापितम् "तस्मान्मूलं यत्नतो रक्षणीयम्" इति तत्र त्रिकरण्या त्रिकालमवश्यं दत्तचित्तैरप्रमत्तैर्भाव्यमिति ।

गायत्रीप्रकाश्यस्य सवितू रुद्रात्मकत्वं कूर्मपुराणे सूर्यहृदये श्रीकूर्मरूपिणा भगवता प्रतिपादितम् । तद्यथा—

ओं खषोल्काय शान्ताय कारणत्रयहेतवे ।
निवेदयामि चात्मानं नमस्ते ज्ञानरूपिणे ॥

त्वमेव विश्वं बहुधा जातं यज्जायते च यत् ।
नमो रुद्राय शान्ताय त्वामहं शरणं गतः ॥

नमस्ते घृणये तुभ्यं सूर्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममापो ज्योती रसोऽमृतम् ॥

भूर्भुवः स्वस्त्वमोङ्कारः सर्वो रुद्रः सनातनः ।
पुरुषस्त्वं महौजास्त्वं प्रणमामि कपर्दिनम् ॥

प्रचेतसे नमस्तुभ्यं नमो मीढुष्टमाय ते ।
नमो नमस्ते रुद्राय त्वामहं शरणं गतः ॥

हिरण्यबाहवे तुभ्यं हिरण्यपतये नमः ।
अम्बिकापतये तुभ्यमुमायाः पतये नमः ॥

नमोऽस्तु नीलग्रीवाय नमस्तुभ्यं पिनाकिने ।
विलोहिताय भर्गाय सहस्राय च ते नमः ॥

नमो हंसाय ते तुभ्यमादित्याय नमो नमः ।
नमस्ते वज्रहस्ताय त्र्यम्बकाय नमो नमः ॥

प्रपद्ये त्वां विरूपाक्षं महान्तं परमेश्वरम् ।
हिरण्मये गृहे गुप्तमात्मानं सर्वदेहिनाम् ॥

नमस्यामि परं ज्योतिर्ब्रह्माणं त्वां परामृतम् ।
विश्वं विश्वपतिं भीमं नरनारीशरीरिणम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

नमः सूर्याय रुद्राय भास्वते परमेष्ठिने ।
उग्राय सर्वभक्षाय त्वां प्रपद्ये सदैव हि ॥
एतद् वै सूर्यहृदयं जप्त्वा स्तवमनुत्तमम् ।
प्रातः काले च मध्याह्ने नमस्कुर्याद् दिवाकरम् ॥ इति ।

न्यायपञ्चाननो न्यायवाचस्पतिरतः परम् ।
विद्यानिधिस्तथास्थानमहाविद्वद्वरश्च यः ॥
धर्माधिकारी च महामहोपाध्याय इत्यपि ।
कृष्णराजेन्द्रभूपालवन्दिताङ्घ्रिसरोरुहः ॥
एवं नानाविरुदभाग् विरूपाक्षमहाशयः ।
न्यायवेदान्तमीमांसापारावारतरिर्गुरुः ॥
तस्याङ्घ्रियुग्मे तच्छिष्यो नारायणसमाह्वयः ।
सन्ध्याविमर्शाख्यरत्नमालां भक्त्या समर्पये ॥
विश्वेश्वरात्मा गुरुराड् विरूपाक्षो विदांवरः ।
कृत्याऽनया प्रीयतां मे दयाब्धिर्देशिकोत्तमः ॥

॥ इति शम् ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ज्योतिषशब्दस्य साधुत्वम्

श्रीरामशङ्करभट्टाचार्यः, अनुसन्धानसंस्थानम्, वा० सं० वि० वि० वाराणसी।

इदं विमृश्यते—इदानीन्तनैः कैश्चिद् विद्वद्भिः प्रयुज्यमानं सूर्यचन्द्रग्रहादिविषयकं शास्त्रं ज्योतिषेति नामधेयं ज्यौतिषेति नामधेयं वेति। अस्मन्मते ज्योतिषमित्येव शास्त्रस्य नाम, न पुनर्ज्यौतिषमिति। ज्यौतिषेतिशब्द आधुनिकविद्वद्भिः कल्पितः, न चायं शब्दः शिष्टव्यवहार-सिद्धो न वा शब्दविदामनुमत इति। केभ्यश्चिद् वर्षेभ्य एव ज्यौतिषेति लेखनप्रवृत्तिर्दृश्यते। अत्र युक्तयः—

(क) महाराष्ट्रद्राविडवङ्गादिदेशेषु ये ग्रन्थाः कतिभ्यश्चिद् वर्षेभ्यः प्राङ् मुद्रितास्तेषु ज्योतिषेत्येव पाठो दृश्यते, न क्वचिदपि ज्यौतिषेति। काश्यामपि प्राचीनमुद्रितेषु ग्रन्थेषु तथैव दृश्यते।

(ख) प्राचीनहस्तलिखितपुस्तकेषु सर्वत्र ज्योतिषेति पदमेव दृश्यते। प्राचीनकोशसंवादैः सह ये ग्रन्थाः सुसंपादितास्तेष्वपि सर्वत्र ज्योतिषेत्येव पाठो मुद्रितः; ज्यौतिषेति पाठान्तरमपि क्वचिन्न निर्दिष्टमिति विज्ञेयम्[1]।

(ग) ज्योतिर्विद्याविषयका ये ग्रन्था उपलभ्यन्ते, स्मर्यन्ते च येषां ग्रन्थानां नामानि, तेषु सर्वत्र ज्योतिश्शब्द एव श्रूयते। एतादृशानां ग्रन्थानां सूची श्रीशङ्करबालकृष्णदीक्षितेन भारतीयज्योतिषनामधेये ग्रन्थे प्रकाशिता। धर्मशास्त्रेऽपि ज्योतिषार्णवनामा (शूलपाणिकृत-दुर्गोत्सवग्रन्थे स्मृतः), ज्योतिषरत्ननामा (सिद्धेश्वरकृतसंस्कारभास्करे स्मृतः), अन्ये च केचन

---

१. कौटलीयार्थशास्त्रे मैसूरसंस्करणे "शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचिति-ज्योतिषमिति षडङ्गानि" (१।२) इत्युक्तम्। बर्लिनूनगरप्रकाशिते चरणव्यूहेऽपि ज्योतिषेत्येव पाठो मुद्रितः (पृ० ३६)। ऋक्प्रातिशाख्यवर्गद्वयवृत्तौ (पृ० १३), दुर्गकृतनिरुक्तटीकायाम् (पृ० २ आनन्दा०), मेधातिथिभाष्ये (४।१९), बृहत्संहितायाम्, ऋग्वेदभाष्यभूमिकायां च ज्योतिषेत्येव पठ्यते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

ग्रन्थाः स्मर्यन्ते, येषु ज्योतिषेत्येव पठ्यते, न क्वचिदपि ज्यौतिषेति। यदि नाम ज्यौतिषेति शब्दः साधुः स्यात् तर्हि क्वचिदस्य प्रयोगो ज्योतिर्विद्याग्रन्थनामसु स्यादिति।

(घ) किञ्च, येषु ग्रन्थेषु पाठभ्रंशः कल्पयितुं न शक्यते, तेषु ग्रन्थेष्वपि ज्योतिषेत्येव पठ्यते। यथा मुण्डकोपनिषदि—"शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषम्" (१।१।५) इति। वैदिकसंप्रदाये क्वचिदपि ज्यौतिषेति न पठ्यत इति विज्ञेयम्[१]।

न चेदं मन्तव्यं यद् ज्योतिषेति छान्दसः प्रयोगः, लौकिकप्रयोगस्तु ज्यौतिषेत्येव। भाष्यकारैर्बहुभिर्नास्य छान्दसता प्रख्यापिता। छान्दसप्रयोगस्थले प्रयोगस्य छान्दसत्वं व्याख्याकाराः प्रायशः कथयन्त्येव, यथा "शीक्षां व्याख्यास्यामः" इति तैत्तिरीयोपनिषद्व्याख्यानावसरे शङ्करादिभिरुक्तं यदयं प्रयोगश्छान्दस इति। ज्योतिषेत्यत्र नैतादृशं किमपि कथनमुपलभ्यते शङ्कराचार्यादिभाष्यकाराणाम्। आपस्तम्बधर्मसूत्रोक्त-शीक्षेतिवेदाङ्गनामप्रसङ्गे "पृषोदरादित्वाद् दीर्घः" इत्याह हरदत्तः।

ज्यौतिषशब्दसाधुत्ववादिनस्तु मन्यन्ते—ज्योतिः (ग्रहादीन्) अधिकृत्य कृतो ग्रन्थ इत्यर्थे "अधिकृत्य" (४।३।८७) इति सूत्रेणाऽण् स्यात्। ततश्च णित्त्वाद् आदिवृद्धौ ज्यौतिषमित्यौकारघटितः पाठ एवोपपन्नो भवेदिति।

परन्तु मतमिदं न युक्तमिति प्रतिभाति। शास्त्रनामानि रूढशब्दा एव; तानि चाऽध्येतृसंप्रदायप्रसिद्धानि। नैतादृशाः सिद्धाः शब्दा व्याकरणेन नियमयितुं शक्यन्ते। अतः "अधिकृत्य कृते ग्रन्थे" इति सूत्रेणात्राऽण् न प्रसक्तो भवति, ज्योतिषेति शास्त्रनाम्नः प्राक् सिद्धत्वात्। मतमिदं पूर्वसूरिभिरप्यभ्युपगतम्। यथाह भानुजिदीक्षितो ज्यौतिषिकशब्दव्याख्यानावसरे—"ज्योतिर्नक्षत्राद्यधिकृत्य कृतो ग्रन्थः, 'अधिकृत्य कृते ग्रन्थे' इत्यण्, संज्ञापूर्वकत्वान्न वृद्धिः, ज्योतिषमधीते वेद वा 'क्रतूक्थादि०' (४।२।६०) इति ठक्" (अमरकोशटीका २।८।१४)। आह चात्र क्षीरस्वामी—"ज्योतींषि ग्रहादीनधिकृत्य कृतो ग्रन्थो ज्योतिषः, ज्योतिषं वेद ज्यौतिषिक इति" (अमरकोषोद्घाटनम्)। अत्र ज्योतिष इति पुंलिङ्गपदं शास्त्रसंमतं न वेत्युपरिष्टाच्चिन्तयिष्यते। ज्योतिषशब्दे औकाराभावार्थं नारायणभट्टोऽप्याह—"ज्योतिषमित्यत्र संज्ञापूर्वकत्वादवृद्धिः" (प्रक्रियासर्वस्वम् ४।८८) इति। दुर्घटवृत्तौ शरणदेवोऽपि संज्ञापूर्वकविधेरनित्यत्व-

---

१. आपस्तम्बधर्मसूत्रे वेदाङ्गनामान्युक्तानि—"कल्पो व्याकरणं ज्योतिषम्·····" (२।८।११) इति। अत्राह हरदत्तः—"सूर्यादीनि ज्योतींष्यधिकृत्य प्रवृत्तं शास्त्रं ज्योतिषम्। आदिवृद्ध्यभावे यत्नः कार्यः" इति।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

माश्रित्य वृद्धिनिषेधं समर्थितवान्[1]। सुभूत्यादीनां शब्दविदामपीदमेव मतमिति शरणदेवेनोक्तम्[2]।

यदि नाम ज्योतिषमिति पदस्याऽसाधुता स्यात् तर्ह्येभिर्वैयाकरणैरित्थमेवोक्तं भवेद् यदयं शब्दः 'कालदुष्टः' इति, अथवा 'भ्रान्त्या कविभिः प्रयुक्तः' इति। ज्योतिषमिति पदं मतान्तरे साध्वित्यपि नोक्तम्। अतो गम्यते यदिदमेव पदं सर्वसंमतमिति। एतेनेदमपि स्पष्टं भवति यज्ज्यौतिषेति शब्दो न केनापि वैयाकरणेन दृष्ट इति, यद्यप्यण्विधायकं सूत्रं विद्यतेऽष्टाध्याय्याम्।[3]

यैर्विद्वद्भिर्ज्यौतिषशब्दस्यैव साधुताऽभ्युपगता, तैर्यो ग्रन्थः संपाद्यते तत्र ज्यौतिषेति पदं लिख्यते प्रकाश्यते च मुद्रितग्रन्थेषु। इदं कृत्यमशोभनमित्यास्माकीना दृष्टिः। तथाहि—छान्दोग्योपनिषद्गतनक्षत्रविद्येतिशब्दव्याख्यायां शङ्कराचार्य आह—"नक्षत्रविद्यां ज्योतिषमिति" (७।१।२)। शाङ्करभाष्यस्य सर्वेषु प्राचीनेषु संस्करणेष्वयमेव पाठो दृष्टः, अद्यतनगीताप्रेससंस्करणे तु ज्यौतिषमिति पाठो दृश्यते। काश्यामेवेदानीं ये ज्योतिर्ग्रन्थाः प्रकाश्यन्ते, तत्र पूर्वप्रचलितपाठं विपरिवर्त्य ज्यौतिषेति शब्दो लिख्यत इति चित्रम्!!

इदमत्रावगन्तव्यं यज्ज्योतिर्विद्याविद् इत्यर्थे ज्यौतिषेति शब्दः पुरुषोत्तमदेवेनोक्तो भाषावृत्तौ (४।२।५९)। तदधीते तद्वेदेत्यर्थेऽणि कृते ज्यौतिषेति शब्दः साधुरेव, यथा ज्यौतिषिकशब्दः (यथोक्तं प्राक्)। नास्य शब्दस्य बाधकं किमपि दृश्यते।

---

१. कथं ज्योतिषं शास्त्रम्? अनेन (अधिकृत्येति सूत्रेण) अणि वृद्धिसंभवात्। उच्यते—संज्ञापूर्वकविधेरनित्यत्वाद् वृद्ध्यभाव इति सुभूतिः (पृ० ९१)। कथं ज्योतिषं शास्त्रमिति? अधिकृत्य कृते ग्रन्थे (४।३।८७) इत्यणि वृद्धेः। उच्यते—संज्ञापूर्वकानित्यत्वादिति भवभूतिः (सुभूतिः?) (पृ० १२६)।

२. ग्रन्थान्ताधिके च (६।३।७९) इति सूत्रव्याख्यानावसरे समुद्धृतं ज्योतिषमिति सिद्धान्तकौमुद्यामुक्तम्। ज्योतिषं ज्योतिःशास्त्रमिति बालमनोरमाकृत्। अत्रोक्तं बृहच्छब्देन्दुशेखरे—"ज्यौतिषमिति पाठे ज्योतिष इदमित्यर्थः" इति। ज्योतिषमित्येव शास्त्रस्य नामेत्यपि व्याख्यानेनानेन सिध्यति।

३. उक्तं च सुपद्मविवरणपञ्जिकायाम्—"ज्योतिषमित्यादिवृद्धिराचार्यैर्नेष्टा (५।३।११८; अत्र ५।२।९६ पञ्जिकाऽपि द्रष्टव्या) "ज्योतिरधिकृत्य कृते ग्रन्थे ज्योतिषम्'' 'णकृतस्यानित्यत्वाद् वृद्धिर्न भवति" (परिभाषासंग्रहे, पृ० २२)।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

"अधिकृत्य कृते ग्रन्थे" इति सूत्रेण सह ज्योतिषशब्दस्य कश्चिदपि संबन्धो विद्यते न वेति विचार्यते। अत्र पाणिनिर्ग्रन्थपदं प्रयुक्तवान्। अतो ग्रन्थो यदा विवक्षितो भवति, तदैवास्य सूत्रस्य प्रवृत्तिः—शारीरकमधिकृत्य कृतो ग्रन्थः (भाष्यरूपः) शारीरकीय इति। ज्योतिषमिति शब्दो न कमपि ग्रन्थमभिधत्ते, विद्याविशेषस्य वाचकोऽयं शब्दः। यथा शिक्षा वा कल्पो वा व्याकरणं वा न कस्यापि ग्रन्थस्य नामधेयम्, परं विद्यायाः शास्त्रस्य वा; तथा ज्योतिषेति शब्दो विद्याविशेषं शास्त्रविशेषं वाऽभिधत्ते, न कमपि ग्रन्थविशेषम्। अस्ति खलु विद्याग्रन्थयोर्भेदः। शास्त्रं नाम विषयानुशासनमात्रम्। ग्रन्थः खल्वाचार्यविशेषकर्तृको निश्चितशब्दानुपूर्वीकः। अनया दृष्टयैवोच्यते—न व्याकरणविद्या पाणिनिना प्रणीता, किं तर्हि सूत्रमिति। शास्त्रग्रन्थयोर्भेदोऽयं सुष्ठु प्रादर्शि मेधातिथिना मनुभाष्ये 'इदं शास्त्रं तु कृत्वासौ...' (१।५८) इति श्लोकं विवृण्वता—"इह शास्त्रपदेन स्मार्तो विधिप्रतिषेधसमूह उच्यते, न तु ग्रन्थस्तस्य मनुना कृतत्वात्" इति। यद्यप्यत्रैव मेधातिथिनोक्तम्—"शास्त्रपदेन ग्रन्थाभिधानमपि शासन-रूपार्थप्रतिपादकत्वाद् दृष्टमेव" इति, अतः शास्त्ररूपेऽर्थेऽपि ग्रन्थशब्दः प्रयोगार्ह इति कथयितुं शक्यते, तथापीदमेव वाक्यं विज्ञापयति यदेतादृशः प्रयोगो लाक्षणिक एव। किञ्च, "शास्त्र-शब्दस्य ग्रन्थे लाक्षणिकः प्रयोगो भवति" इति मते सिद्धेऽपि ग्रन्थपदं लक्षणया शास्त्रे प्रयोज्य-मिति कथनं न सिद्धं भवति। पाणिनिसूत्रे ग्रन्थपदमेव विद्यत इति विज्ञेयम्।

पूर्वोक्तयुक्तिभिरस्माभिरिदं निर्धार्यते यद् ज्योतिर्विद्यारूपेऽर्थे ज्योतिषमिति रूढः शब्दः। यद्वा ज्योतिः (सूर्यादि) अस्यत्र विचारणीयत्वेनेत्यर्थेऽच्प्रत्ययो मत्वर्थीयः कल्पनीयः। यथोक्तं दुर्घटवृत्तिकृता—"ज्योतींषि नक्षत्राण्यस्य सन्ति गणनीयत्वेनेत्यर्शआद्यच्" इति (पृ० ९१)। अनया रीत्या ज्योतिषमिति शास्त्रस्य नामधेयमिति सुष्ठूपपन्नं भवति।

ज्योतिषशब्दात् स्वार्थेऽणि कृते ज्यौतिषमिति शब्द उपपन्नो भवितुमर्हतीति केचन मन्यन्ते। यदि नाम शब्दोऽयं संस्कृतवाङ्मये प्रयुक्तः स्यात्, तर्ह्येवैतादृश्युपपत्तिः कल्पनीया भवेत्। अप्रयुक्तोऽयं शब्द इत्येव प्राक् प्रतिपादितम्, अतो ज्योतिषेत्येव शब्दः प्रयोज्यो न पुनर्ज्यौतिषेति शब्दः॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लघुग्रन्थरत्नप्रभावलिः—१७

सिंहलताजिकोक्ताः षोडशयोगाः

तथा

नृसिंहदैवज्ञविरचितः

प्रश्नसारः

सम्पादकः

श्रीमीठालाल-हिम्मतराम-ओझा

वाराणसेयसंस्कृतविश्वविद्यालये ज्यौतिषप्राध्यापकः ।

सारस्वती सुषमा

ज्येष्ठपूर्णिमा, संवत् २०२१

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रास्ताविकम्

वाराणसेयसंस्कृतविश्वविद्यालयान्तर्गतसरस्वतीभवनाख्ये पुस्तकालये हस्तलिखितपुस्तकसंग्रहे प्राचीनपुस्तकावलोकनप्रसङ्गे "सिंहलोक्तषोडशयोगाः प्रश्नसारश्च" इति प्राचीनं हस्तलिखितमेकं पुस्तकं दृष्टम्। यस्याकारः ८.४×३.७ पत्रसंख्या १-५ तथा च पङ्क्त्याक्षरसंख्या ४० अस्ति। सिंहलशब्ददर्शनाद् हृदि समुत्कण्ठा समजनि यत् सिंहलदेशेऽपि ज्यौतिषशास्त्रस्य प्रचार आसीदिति। दैवज्ञकामधेनुग्रन्थरचयिताऽनवमदर्शी दैवज्ञः सिंहलद्वीपस्यैवासीत्। परन्तु "सिंहलोक्तषोडशयोगाः" इत्यस्य रचयिता कुत्रत्य इति निश्चेतुं न शक्यते। पुस्तकस्यादावन्ते वा रचयितुर्नामादिकं किमपि नास्ति। ये एते—"गुलाला गुलाली खुशाला खुशाली फलासा फलूसी वदारा वदारी॥ तमाला तमाली तगी तेग तेगा नमीसाव संजीर संजीव योगाः॥ १॥" इति षोडशयोगाः सन्ति, तेषां कृते प्रयुक्ताः शब्दाः सिंहलीभाषायां वा दक्षिणप्रान्ते प्रचलितासु तेलगु-तमिल-कन्नड-मलयालमादिभाषासु[1] वा न सन्ति। अत एतत्त्वनुमीयते यदस्य लेखकः सिंहलद्वीपीयो नास्ति। सिंहलनामा कश्चिदाचार्यः स्यादिति। एतदपि विचित्रं यत्ताजिकनीलकण्ठ्यादिताजिकपुस्तकेषु प्रसिद्धा ये षोडशयोगास्तद्भिन्ना एत इति तद्विदां स्पष्टमेव। एवं चैतादृशा एव षोडशयोगाः प्रश्नसारे यवनोक्ताः सन्तीति। ते चैते—

मुकाबिल्ल काबिल्ल लालील लत्ताऽरिहन् दोशना गोशना चीन कोशाः।
कलावार वारा समाशल्य दिल्ला तथा वादला संदला चेति योगाः॥ १॥

जातकग्रन्थे ग्रहनामनिर्देशपुरःसरं यथाऽनेके योगाः सन्ति, तथाभूता एवैते सन्ति। अत इत्थशालादीनामिवैतेषां योगानां यवनेभ्य आगमं तर्कयितुं न शक्यते। कुत्रापि ताजिकग्रन्थे विशेषग्रहस्य विशेषस्थानस्थित्या योगसिद्धिर्नास्ति। अत एतत् ताजिकं कथमप्यन्वेष्टव्यं विद्वद्भिः। सिंहलताजिकोक्तषोडशयोगानां प्रश्नसारोक्तषोडशयोगानां च साम्यमिवास्ति, नेतरताजिकोक्तयोगानाम्। अत एषां कुत्रोत्पत्तिः संजातेति संशयास्पदमेव। इतिहासकारैरपि फलितज्यौतिषविभागस्तथा न प्रपञ्चितो यथा सिद्धान्तज्यौतिषभागः। एतदप्याश्चर्यं यदेतत् पुस्तकद्वयं रामनगरस्थश्रीकृष्णजोशीगृहे संरक्षितमासीत्। आभ्यामन्या प्रतिलिपिर्न दृष्टिपथं समागता।

श्रीमन्नृसिंहदैवज्ञविरचितः प्रश्नसारः

अस्य श्रीनृसिंहदैवज्ञस्य जनको रङ्गनाथदैवज्ञ इति पुस्तकसमाप्तौ लिखितश्लोकेन ज्ञायते। परं पुस्तकस्यादावन्ते वा कुत्रापि स्वजन्मसमयभूमिप्रभृतिविषये किमपि नोप-

1. अरबीफारसीभाषयोरप्येते शब्दा नोपलभ्यन्ते। उभयभाषासंमिश्रितशब्दस्य विभक्त्यादिदानेन वैचित्र्यं समुत्पादितमित्यनुमीयते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

लभ्यते। अन्तिमश्लोके रचयितुर्माहात्म्यवर्णने तच्छिष्यस्य कृपारामस्योल्लेखो वर्तते। अयं कृपारामः १४२० शकासन्नकालेऽभवदिति श्रीशङ्करबालकृष्णदीक्षितलिखितज्यौतिषशास्त्रेतिहासाद् ज्ञायते। यद्ययमेव लेखकाभिप्रेतस्तदाऽस्याचार्यस्याप्ययमेव कालोऽस्तीत्यनुमातुं शक्यते। श्रीकमलाकरभट्टजनकोऽयं नृसिंहदैवज्ञो नास्ति। अपि तु कृष्णदैवज्ञ आसीत्। यदि नृसिंहदैवज्ञः कमलाकरभट्टानुजरङ्गनाथपुत्र इति कल्प्यते, तदा जीवनकालदृष्ट्या ग्रन्थकारस्य शिष्यः कृपारामो भवितुं नार्हति। यतो हि कमलाकरभट्टानुजरङ्गनाथस्य कालः १५३४ अस्यासन्नशको वर्तते। यदि श्रीरङ्गनाथदैवज्ञस्य मुनीश्वरस्य भ्राताऽयमाचार्य इति कल्प्यते, तदा तादृशी प्रसिद्धिर्नास्ति। एवं चोपरि प्रदर्शितकालबाधा समुदेति। मुनीश्वरोऽपि कमलाकरभट्टसमकालिक एव। अतः प्रसिद्धरङ्गनाथपुत्रोऽयं नृसिंहदैवज्ञो नास्ति। अन्योऽपि नृसिंहदैवज्ञो जातः। अस्य जनको ग्रहलाघवकारगणेशदैवज्ञभ्राता रामदैवज्ञ आसीत्। द्वितीयनृसिंहेन १४८० शककाले मध्यग्रहसिद्धिग्रन्थस्य रचना कृताऽस्ति। तस्माद् द्वितीयनृसिंहदैवज्ञोऽपि प्रकृतपुस्तककर्ता नास्ति। प्रकृतपुस्तककर्त्रा स्वपितुर्माहात्म्यं कृपारामगुरुत्वेन प्रकटितम्। कृपारामेणानेकाष्टीकाः पुस्तकानि च रचितानीति स्वकाले प्रसिद्धो भवेत्। अतः स्वपितुः शिष्यस्य कृपारामस्य यः कालः स एव १४२० शकासन्नकालः प्रस्तुतपुस्तकरचयितुर्भवेदिति प्रतीयते।

अनेनाचार्येण स्वजन्मभूमिविषयेऽपि किमपि नावेदितम्। अतोऽस्य विशेषपरिचयः प्राप्तुमशक्यः। नाम्नाऽनुमीयते दाक्षिणात्योऽयमिति।

प्रश्नसारस्य प्रश्नावलोकनक्रमदर्शनेनापूर्वोऽयमिति महदाश्चर्यम्। केवलप्रश्नकालिकलग्नराशिज्ञानेनैव सर्वमवबुध्यते। प्रश्नकुण्डल्यां ग्रहनिवेशादीनामप्यावश्यकता नास्ति। अतः स्वल्पाभ्यासिनाऽपि सामयिकप्रश्नानां विचारः कर्तुं शक्यते। अस्योपरि टीका श्रीरघुनाथसुतवेङ्कटेशकृता वर्तते। १४८४ शकासन्नकाले रघुनाथदैवज्ञः संजातः। तत्पुत्रोऽयं वेङ्कटेशोऽन्यो वेति निश्चेतुं न शक्यते, तथापि तादृशी संभावना कर्तुं शक्यते। एतत् पुस्तकं शुद्धमप्येकत्र खण्डितं कुत्रचिच्च शब्दाक्षरदोषंवदासीत्। तत् पूर्वापरसम्बन्धदृष्ट्या यथाशक्यं शोधितमस्ति। मन्येऽनेन पुस्तकेन ज्यौतिषे स्वल्पश्रमाणामुपकारो भविष्यतीति शम्॥

संवत् २०२० विद्वद्विधेयः—

होलिकोत्सवः। मीठालाल-हिम्मतराम-ओझा।

---

१. अस्याचार्यस्य बीजगणित-मकरन्द-यन्त्रचिन्तामणि-ग्रन्थानामुदाहरणरूपाष्टीकाः सन्ति। एवं च सर्वार्थचिन्तामणिपञ्चपक्षीमुहूर्ततत्त्वपुस्तकानामप्याचार्यकृता व्याख्याः सन्ति। स्वरचितग्रन्थश्च वास्तुचन्द्रिका वर्तते।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सिंहलताजिकोक्ताः षोडशयोगाः

अथ सिंहलताजिकोक्तषोडशयोगा लिख्यन्ते । तत्रादौ तेषां नामानि लिख्यन्ते—

गुलाला १ गुलाली २ खुशाला ३ खुशाली ४ फलासा ५ फल्लूसी ६ वदारा ७ वदारी ८ ।
तमाला ९ तमाली १० तगी ११ तेग १२ तेगा १३ नमीसाव १४ संजीर १५ संजीव १६ योगाः ॥१॥

गुलालेति स्पष्टम् ॥ १ ॥

अथ (१) गुलालायोगमाह—

भृगावोजराशेर्यदा कन्यकांशे अजान्ते गुरौ जन्मभांशे च लग्ने ।
रिपोर्नाशनं स्त्रीविलासं सुखं च नरं सर्वसिद्धिं गुलालाख्ययोगे ॥ २ ॥

भृगाविति । मेषमिथुनादिविषमराशौ कन्यांशे शुक्रे मेषान्त्यनवमांशे धन्वंशे गुरौ जन्मराश्यंशे लग्ने च सति गुलालाख्ययोगः शत्रुनाश-स्त्रीसुख-सर्वमनोरथसिद्धिदः । इति गुलालाख्ययोगः ॥ २ ॥

अथ (२) गुलालीयोगमाह—

ग्रहाः क्रूरसौम्या अरिष्टे च रिष्टे सुरेज्यो विधुः सैंहिकेयस्त्रिकोणे ।
नृपात् सौख्यकारी जयं शत्रुमध्ये ततो द्रव्यलाभो गुलाल्याख्ययोगे ॥ ३ ॥

ग्रहा इति । क्रूरग्रहा अरिष्टे उपचयस्थाने ३-६-१०-११ सौम्याः शुभग्रहा रिष्टे शुभस्थानेषु १-२-४-५-७-९-१२ गुरुश्चन्द्राहुस्त्रिकोणे ९-५ चेत् तदा गुलालीयोगो राज्ञः सख्यं शत्रुमध्ये जयं ततो द्रव्यलाभं च करोति । इति गुलालीयोगः ॥ ३ ॥

अथ (३) खुशालायोगमाह—

धने सौम्यखेटा अरिस्थाश्च पापा भृगौ कर्मगे ज्ञे विधौ वाक्पतौ वा ।
पुरग्रामलाभं धनं धान्यवस्त्रं कलत्रादिसौख्यं खुशालाख्ययोगे ॥ ४ ॥

धन इति । द्वितीयभावे शुभग्रहाः षष्ठभावे पापग्रहा भृगौ कर्मगे दशमे ज्ञे विधौ वाक्पतौ वा दशमे तदा खुशालाख्ययोगः पुरग्रामादिलाभसौख्यकरः । इति खुशालायोगः ॥ ४ ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ (४) खुशालीयोगमाह—

तृतीयेऽथ शुक्रे गुरुर्धर्मचारी विधुर्मन्दयुक्तो यदा लग्न [1]वत ।
प्रभूता विवृद्धिः सुखं सम्पदा दि हिरण्यादिलाभं खुशालाख्ययोगे ॥ ५ ॥

तृतीयेति । तृतीयस्थाने शुक्रो नवमस्थाने गुरुः शनियुतश्चन्द्रो लग्ने यदा तदा खुशालीयोगः प्रभुत्वविवृद्धिसुखसम्पत्स्वर्णादिलाभकरः । इति खुशालीयोगः ॥ ५ ॥

अथ (५) फलासायोगमाह—

लाभे व्यये लग्नगते च सौम्यो(ये ?) विधौ रिपुस्थे मदने च सौम्याः ।
प्राप्तिश्च काले फलहानितायाः सर्वार्थनाशः(शं ?) कुरुते फलासा ॥ ६ ॥

लाभ इति । लाभव्ययलग्नान्यतमस्थाने विद्यमानः सौम्यो बुधः, रिपुगश्चन्द्रः, सप्तमे सौम्याः शुभग्रहास्तदा फलासायोगो मिश्रफलः फलहानितायाः काले प्राप्तिस्ततः सर्वार्थनाशः (शं ?) कुरुते । इति फलासायोगः ॥ ६ ॥

अथ (६) फल्लसायोगमाह—

धने व्यये छिद्ररिपुस्थिता वा पापाश्च सौम्या विषलाश्च कुर्युः ।
क्लेशं विवादं पशुपीडनं च फल्लसयोगे स्वजनैश्च वैरम् ॥ ७ ॥

धन इति । द्वितीयद्वादशाष्टमषष्ठभावेषु बलिनः पापास्तेष्वेव स्थानेषु सौम्याः शुभग्रहा निर्बलाः स्थितास्तदा फल्लसायोगः क्लेशाद्यनिष्टफलदः । इति फल्लसायोगः ॥ ७ ॥

अथ (७) वदारायोगमाह—

लग्नाधिपो भौमयुते (तः ?) च रन्ध्रे रन्ध्राधिनाथे व्ययगे रिपुस्थे ।
करोति कष्टं रिपुणा विवादं शस्त्राभिघातं कुरुते वदारा ॥ ८ ॥

लग्नाधिप इति । लग्नाधिपो भौमयुतो रन्ध्रे मृत्युभवने स्थितः मृत्युभावाधिपतिर्व्ययभावे-शत्रुभावे वा स्थितस्तदा वदारायोगः । स कष्टाद्युक्तानिष्टफलं कुरुते । इति वदारा योगः ॥ ८ ॥

अथ (८) वदारीयोगमाह—

तनुपतौ व्ययभावगते रवौ विधुयुते रिपुगेऽथवाष्टमे ।
[2]तदपि योगकृतं धनहानिदं [3]यदि तदाष्टगते च वदारिकम् ॥ ९ ॥

---

१. 'लग्नसंस्थः' इति पाठः शुद्धः ।

२. 'रोगकृते' इति शुद्धः पाठः ।

३. 'भवति योगगतं च' इति पाठान्तरम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

तनुपताविति। लग्नेशे व्ययभावगते चन्द्रयुते रवौ रिपुभावस्थेऽथवा मृत्युभावस्थे तदा वदारीयोगोऽष्टमः, स रोगकृत[1]धनहानिं करोति। इति वदारीयोगः ॥ ९ ॥

अथ (९) तमालायोगमाह—

लग्नेश्वरो व्या(व्योम ?) कलत्रतुर्ये तद्भावनाथो यदि तुर्यवृत्तः(संस्थः ?)।
गजाधिपो वाहनपैतृसौख्यं शत्रुक्षयं योगगते तमाला ॥ १० ॥

लग्नेश्वर इति। लग्नेश्वरो दशमसप्तमचतुर्थभावान्यतमस्थो दशमसप्तमचतुर्थभावेशो यदि चतुर्थभावगस्तदा तमालायोगो गजाध्यक्षताद्युक्तशुभफलदः। इति तमालायोगः ॥१०॥

अथ (१०) तमालीयोगमाह—

लग्नाधिपो वसति भौमयुतो स्वभावे कर्माधिपो वसति लग्नधने कलत्रे।
संतानसिद्धिसुखदं (दा ?) नृपदत्तमान्यं (नं ?) धान्यादिभूषणधनं कुरुते तमाली ॥११॥

लग्नाधिप इति। भौमयुते धनभावे लग्नाधिपो विद्यमानोऽस्ति। दशमेशो लग्नधन-सप्तमभावान्यतमस्थस्तदा तमालीयोगः। स संतानप्राप्त्याद्युक्तशुभफलदः। इति तमालीयोगः ॥ ११ ॥

अथ (११) तगीयोगमाह—

सुतेशो गुरुर्ज्ञो विधुः कीटराशौ त्रिकोणे च शुक्रे वृषे वाऽथ मीने।
तदा धर्मवृद्धिश्च सन्तानसौख्यं धनं धान्यलाभं तगीयोगमध्ये ॥ १२ ॥

सुतेश इति। पञ्चमेशो गुरुर्बुधश्चन्द्रश्चेमे कर्कराशिस्थाः, पुनः शुक्रो वृषराशिगतो मीनगतो वा त्रिकोणे नवमपञ्चमभावान्यतरभावस्थस्तदा तगीयोगो धर्मवृद्ध्याद्युक्तफलदः। इति तगीयोगः ॥ १२ ॥

अथ (१) तेगयोगमाह—

शुक्रज्ञभास्करिविधुक्षितिजेऽस्तछिद्रे लग्ने यदा भवति जीवयुते च दृष्टे।
नानाविलाससुखभोगयुतं च लाभं व्यापारसिद्धिमतुलां कुरुते च तेगः ॥१३॥

शुक्रज्ञ इति। शुक्रबुधशनिचन्द्रभौमाः सप्तमाष्टमलग्नगा गुरुणा युता दृष्टा वा तदा तेगयोगः, नानाविलाससुखभोगावाप्त्याद्युक्तशुभफलदः। इति तेगयोगः ॥ १३ ॥

---

१. रोगनिमित्तो धनव्ययो भवतीत्यर्थः।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ (१३) तेगायोगमाह—

अरौ धर्मलाभे व्यये पापखेटे[1] थिहा[2] जन्मवर्षाधिपाः केन्द्रसंस्थाः ।
तदा राजमान्यं तथा शत्रुनाशं सुखं सर्वलाभं यदा योगतेगा ॥ १४ ॥

अराविति षष्ठनवमैकादशद्वादशभावस्थाः पापखेटाः, मुन्था जन्मलग्नवर्षेशाः केन्द्रस्थास्तदा तेगासंज्ञको योगः, स राजमान्याद्युक्तशुभफलदः । इति तेगायोगः ॥ १४ ॥

अथ नमीसावयोगमाह—

भृगुगृहे सुरराजसुपू[3]जिते गुरुगृहे वसते भृगुनन्दने ।
पणफरे[4]ऽपि च तेऽम्बरतुर्यगे द्विगुणलाभकरो नमिसावकः ॥ १५ ॥

भृगुगृह इति । वृषतुलान्यतरराशौ गुरुर्धनुमीनान्यतरराशौ शुक्रः सन् पणफरे २।५।८।११ दशमचतुर्थान्यतम१०।४भावेषु स्थितौ तदा नमीसावयोगः, स द्विगुणलाभकरः । इति नमीसावयोगः ॥ १५ ॥

अथ (१५) संजीवयोगमाह—

यदि पराक्रमलाभगते रवौ शुभखगा हिबुके च कलत्रगाः ।
सुतसुखं कुरुते विपुलं धनं महति कीर्तियुतोऽपि [5]सजावकः ॥ १६ ॥

यदीति । सूर्यस्तृतीयैकादशभावगः, शुभग्रहाश्चतुर्थसप्तमगास्तदा संजावयोगः । स पुत्र सुखाद्युक्तशुभफलदः । इति संजावयोगः ॥ १६ ॥

अथ (१६) संजीवयोगमाह—

लग्नेशलाभेशसुतेश[6]तुर्येशखेशखेटा द्युनगाः सुखस्थाः ।
तद्भावसौख्यं बहुलं च तेजः संजीवयोगेऽपि च हायनेऽस्मिन् ॥ १७ ॥

---

१. 'खेटाः' इति पाठान्तरम् ।
२. 'समेशाङ्गमुन्थाधिपाः' इति पाठान्तरम्
३. 'पुरोहिते' इति पाठान्तरम् ।
४. अस्मिन् चरणे 'तेऽम्बर' इति पदप्रयोगे दोषः । अतः 'दशमेऽपि च तुर्यगौ' इति पाठान्तरं साधु ।
५. अत्र छन्दोभङ्गभियाऽनुस्वारो न प्रयुक्तः ।
६. अत्र छन्दोभङ्गस्य "उपेन्द्रवज्रा प्रथमे लघौ सा" इति नियमेन परिहारो भवति । अन्यथा 'नाथाम्बरेशाः' इति पाठान्तरम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

इति सिंहलताजिकोक्ताः षोडशयोगाः सम्पूर्णाः ॥

लग्नेति । लग्नैकादशपञ्चमचतुर्थदशमेशाः सप्तमेशाः सप्तमचतुर्थभावस्थास्तदा संजीवयोगः । स तस्मिन् वर्षे शरीरसुखादितत्तद्भावोक्तविचार्यपदार्थानां सौख्यदः । इति संजीवयोगः ॥ १७ ॥

इति श्रीसिंहलताजिकोक्तषोडशयोगव्याख्या समाप्ता ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ प्रश्नसारे समागतविषयाणां सूची

राशीनां गर्भादिसंज्ञा गर्भविचारश्च
गर्भे पुत्रः कन्या वेति विचारः
विद्याविवाहविचारः
गृहस्य युद्धस्य च विचारः
जयपराजयविचारः
वस्तुसमर्घादिविचारस्तथा च यात्राविचारः
जलाशयविचारः
जलविचारस्तथा बन्धमोहविचारश्च
पशुक्रयविक्रयविचारः
मुष्टिगतवस्तुविचारः
प्रकारान्तरेण वस्तुवर्णज्ञानम्
वस्तुस्वादाकारयोर्धातुमूलादीनां च विचारः
अथोपसंहारः
स्ववंशवर्णनम्

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ प्रश्नसारः
श्रीनृसिंहदैवज्ञविरचितः

नत्वेभास्यं सिंदुरोद्भासिताङ्गं गण्डस्थालिश्रेणिशोभाविलासम् ।
देवैः सर्वैः सेवितं पादपद्मं यस्याहं तं प्रश्नसारं प्रवच्मि ॥ १ ॥

अथ प्रश्नसार उच्यते । नत्वेति स्पष्टम् ॥ १ ॥

राशीनां गर्भादिसंज्ञां गर्भविचारं चाह—

द्वारं वाह्यं गर्भराशिं च मेषाद् भे गर्भे निर्दिशेत् पृच्छकाय ।
वाह्ये लग्ने दीर्घकालेन सिद्धिर्नास्ति द्वारे प्रश्नकाले च वाच्यम् ॥ २ ॥

द्वारमिति । मेषात् क्रमाद् राशित्रितयस्य द्वारं बाह्यं गर्भम् इति संज्ञा ज्ञेया । एवं पुनः पुनः कर्कात् तुलातो मकरतो राशित्रितयस्य द्वारबाह्यगर्भसंज्ञा जानीयात् । यथा मेषे द्वारं वृषे वाह्यं मिथुने गर्भम् । एवं पुनः पुनर्जानीयात् । अथ गर्भप्रश्नमाह—गर्भराशिलग्ने गर्भप्रश्ने गर्भस्त्वरया भवति । बाह्ये लग्ने दीर्घकालेन गर्भः । द्वारलग्ने नास्ति गर्भ इति पृच्छकं प्रति वदेत् ॥ २ ॥

गर्भे पुत्रः कन्या वेति विचारः—

वाह्ये पुत्रः कन्यका द्वारगर्भे वाह्ये लग्ने पूर्णमायुश्च रोगी ।
गर्भेऽल्पायुर्द्वारभे पृच्छकाय जातापत्ये वाच्यमेवं प्रवीणैः ॥ ३ ॥

(बा)ह्य इति स्पष्टोऽर्थः ॥ ३ ॥

अथ विद्याविवाहविचारः—

विद्याप्रश्ने द्वारभे सिद्धिरुक्ता वाह्ये भ्रान्तिर्गर्भभे नाश एव ।
वाह्ये लग्ने लग्ने[1] लग्नसिद्धिस्तु नैव गर्भे यत्नाद् द्वारभे दारसिद्धिः ॥ ४ ॥

विद्येति । गर्भभे नाशो विद्याभावः । लग्नसिद्धिर्विवाहसिद्धिर्नैव । अन्यत् स्पष्टम् ॥ ४ ॥

---

१. एतदधिकं पदम् ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ गृहयुद्धयोर्विचारः—

गर्भे वेश्म शुभं भवेत् त्वशुभदं द्वारे च बाह्ये तथा
प्रश्ने मन्दिरसाधनस्य सुधियादेश्यं फलं त्वीदृशम् ।
गर्भे संधिकरं हि बाह्यभवने तीव्रं च युद्धं भवे-
दल्पं द्वारगृहे हि युद्धसमये प्रश्नं वदेद् बुद्धिमान् ॥ ५ ॥

गर्भे इति । स्पष्टोऽर्थः ॥ ५ ॥

अथ जयपराजयविचारः—

जयस्य चिन्ता समये विचिन्त्यं बाह्ये जयं द्वारगृहे च साम्यम् ।
गर्भे परेषां विजयो भवेच्च विचार्य सम्यक् कथयेत् तु तज्ज्ञः ॥ ६ ॥

जय इति । स्पष्टोऽर्थः ॥ ६ ॥

अथ वस्तुसमर्घादिविचारस्तथा च यात्राविचारः—

बाह्ये महर्घं समता च गर्भे द्वारे ह्यनर्घं कथयेत् क्रमेण ।
द्वारे च यात्रा भवतीति बाह्ये न [1]रोगगर्भे गमने विचिन्त्यम् ॥ ७ ॥

बाह्येति स्पष्टम् ॥ ७ ॥

अथ जलाशयविचारः—

तटाकचिन्तासमये तटाकं पूर्णं भवेद् गर्भतनौ विलग्ने ।
द्वारे विलग्ने खलु बाह्यसंज्ञे विस्तारसिद्धिं कथयेत् तु तज्ज्ञः ॥ ८ ॥

तटाकेति । विस्तारसिद्धिं चिरकालेन बहुद्रव्यव्ययेन च तटाकसिद्धिं वदेत् । अन्यत् स्पष्टम् ॥ ८ ॥

अथ जलविचारस्तथा बन्धमोक्षविचारश्च—

गर्भे नैव जलं भवेद् बहु जलं द्वारे शिलासंकुलं
बाह्ये कूपविधौ वदेदिति तथा शास्त्रं विदित्वा फलम् ।

---

१. अत्र ग्रन्थकारस्याशयो गर्भे प्रश्नलग्नराशौ सति यदि यात्रा क्रियते तदा रोगो भवतीति प्रतिभाति । तथा सति "द्वारे च यात्रा सुलभा न बाह्ये रोगस्तु गर्भे गमने विचिन्त्यः" इति पाठान्तरम् । 'न रोगगर्भे' इति पाठे भाषादोषः समापतति ।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

गर्भे बन्धविमोचनं नहि भवेद् द्वारे भवेत् सत्वरं
प्रश्नबन्धविमोचनस्य चिरतो बाह्ये च [1]मूर्तिं वदेत् ॥ ९ ॥

गर्भ इति स्पष्टम् ॥ ९ ॥

अथ पशुक्रयविक्रयविचारः—

[2]प्रश्ने पशूनां क्रयविक्रयस्य बाह्ये जयो द्वारतनौ तु मध्यम् ।
रोगो भवेद् गर्भतनौ नराणां दैवज्ञवर्येण विकत्थनीयम् ॥ १० ॥

प्रश्न इति स्पष्टोऽर्थः ॥ १० ॥

अथ मुष्टिगतप्रश्नविचारः—

द्वारे गर्भतनौ तु दक्षिणकरे वामे करे बाह्यभे
[3]चे................................गर्भे वदेल्लोहितम् ।
शुभ्रं द्वारगृहे तु बाह्यभवने श्यामं च गर्भे तथा
शुभ्रं पूर्वदलेऽन्तयोश्च दलयोर्वर्णं तु रक्तं वदेत् ॥ ११ ॥

द्वारेति । द्वारभे गर्भभे लग्ने दक्षिणकरे वस्तु । बाह्यलग्ने वामकरे वस्तु वदेत् ।[4].................गर्भे रक्तवर्णं द्वारगृहे शुभ्रं बाह्यभे श्यामवर्णं वस्तु । तथा द्रेष्काणैर्वर्णं वदेत् । गर्भलग्ने पूर्वदले प्रथमद्रेष्काणे शुभ्रवर्णं वदेत् । अन्त्ययोर्द्वितीयतृतीयद्रेष्काणयो रक्तवर्णं वस्तु वदेत् ॥ ११ ॥

---

१. अत्र 'पूर्तिम्' इति पाठे कृते कथमप्यर्थसंगतिर्भवति । बाह्ये लग्ने राशौ बन्धविमोचनस्य चिरकालेन पूर्तिं वदेत् । अर्थाद् बन्दीजनश्चिरकालेन मुक्तो भवतीत्यर्थः । अथवा 'सिद्धिम्' इति पाठान्तरम् ।

२. बाह्ये लग्ने पशूनां क्रयविक्रये लाभः । द्वारलग्ने मध्यं फलम् । गर्भलग्ने क्रयविक्रये पशूनां रोगो भवतीत्यर्थः ।

३. नेदं वस्तु नरस्य हस्तनिहितं गर्भे वदेल्लोहितमिति पूर्तिः क्रियते तदाऽर्थसंगतिर्भवति ।

४. 'मुष्टिगतवस्तुवर्णविचारे' इति टीकायां योज्यते, तदा पूर्वापरसन्दर्भः संगतार्थो जायते । अत्र पद्ये दलशब्दप्रयोगो न साधुः प्रतिभाति । दलशब्दार्थोऽर्धवाचको न तु राशित्रिभाग(द्रेष्काण)बोधकः । अतः "द्रेष्काणे प्रथमे सितं च परयोर्वर्णं तु रक्तं वदेत्" इति पाठन्तरे कृते स्पष्टार्थावबोधः ।

१३

CC-0. Sampurnanand University Collection. Digitized by eGangotri

अथ प्रकारान्तरेण वस्तुवर्णज्ञानम्—

श्वेतं रक्तं कृष्णवर्णं क्रमेण द्वारस्याद्ये मध्यभागे गमे[1] च।
बाह्यस्याद्ये मध्यमे स्यात् तदन्ते रक्तं कृष्णं चित्रवर्णं क्रमेण ॥ १२ ॥

श्वेतमिति। द्वारलग्ने प्रथमद्वितीयतृतीयद्रेष्काणैः क्रमेण श्वेतं रक्तं कृष्णवर्णं च निर्दिशेत्। तथा बाह्यलग्ने प्रथमद्रेष्काणे रक्तवर्णं द्वितीये कृष्णवर्णं तृतीये चित्रवर्णं क्रमेण निर्दिशेत् ॥ १२ ॥

अथ वस्तुस्वादाकारयोर्धातुमूलादीनां च विचारः—

क्षारं द्वारगृहे तु गर्भ(ज)भवने मिष्टं वदेद् बाह्यभे
गर्भे बाह्यतनौ तु वर्तुलमथो द्वारे चतुःकोणकम्।
जीवं गर्भगृहे हि बाह्यभवने मूलं तथा द्वारभे
धातुं ज्योतिषिकैर्विचार्य सहसा प्रश्ने प्रवाच्यं नृणाम् ॥ १३ ॥

क्षारमिति। द्वारगृहे कूपादौ जलं वा फलादिभक्ष्यं वस्तु क्षारं वदेत् तु तथैव गर्भभवने क्षारं वदेत्। बाह्यभे मिष्टं वदेत्। अथ द्वारगृहे गर्भभे भवनमध्ये बाह्यभे बाह्यदेशे धनादि वदेत्। गर्भभे बाह्यभे च वर्तुलं द्वारभे चतुष्कोणं वदेत्। अथ गर्भगृहे [2]चिन्तां वदेत्। बाह्यगृहे मूलं द्वारभे धातुं वदेत्। ज्योतिषिकैः प्रश्ने एवं विचार्य नॄन् प्रति सहसा वाच्यम् ॥ १३ ॥

अथोपसंहारः—

यदुक्तं नारदाद्यैश्च ऋषिभिर्लग्नतः फलम्।
अनुष्टुप्छन्दसा युक्तं तत् सद्वृत्तैः सुसाधितम् ॥ १४ ॥

अथ स्ववंशवर्णनम्—

श्रीमत्समस्तावनिमण्डलायः[3] [4]कृपाकराचार्यनुताङ्घ्रिपद्मः।
श्रीरङ्गनाथस्तनुजेन तस्य नृसिंहनाम्नाऽतिकृतं हि सारम् ॥ १५ ॥

इति नृसिंहदैवज्ञरचितप्रश्नसारः समाप्तः ॥

इति श्रीरघुनाथदैवज्ञसुतवेङ्कटेशकृतप्रश्नसारटीका समाप्ता ॥

---

१. 'अन्तिमे च' इति पाठः साधुः प्रतीयते।

२. धातुचिन्तामित्यर्थः।

३. अत्र श्रीमत्समस्तावनिमण्डलाढ्य इति पाठे कृतेऽर्थसौन्दर्यं समुपलभ्यते।

४. अत्र छन्दोभङ्गभिया कृपाराम इत्यस्य स्थाने कृपाकराचार्य इति कृतम्।

CC-0. Sampurnanand University Collection. Digitized by eGangotri

प्रश्नविचारप्रसङ्गे प्रसङ्गतः कस्यचिद् विचारः—

तिथिः (थिं) पञ्चगुणीकृत्य दिनर्क्षमत्र मेलयेत् ।
त्रिभिश्चैव हरेद् भागं त्रिविधश्चन्द्र उच्यते ॥ १ ॥
एकेन जलगो ज्ञेयो द्वाभ्यां स्थलगतः शशी ।
शून्ये स्वर्गे विजानीयादिति चन्द्रस्य लक्षणम् ॥ २ ॥
जले सिद्धिर्हि कार्यस्य स्थले वै मध्यमं फलम् ।
चन्द्रः सकलकार्येषु निन्द्यो विष्णुपदाश्रितः ॥ ३ ॥

इति चन्द्रचारविचारः ॥

CC-0. Sampurnanand University Collection. Digitized by eGangotri

CC-0. Sampurnanand University Collection. Digitized by eGangotri

रजिस्टर्ड न्यूज पेपर्स एक्ट के नियम के अन्तर्गत
विज्ञप्ति

१. प्रकाशन का नाम	सारस्वती सुषमा
२. प्रकाशन की तिथि	त्रैमासिक
३. मुद्रक का नाम	श्री बलदेवदास
राष्ट्रियता	भारतीय
पता	संसार प्रेस, संसार लिमिटेड, काशीपुरा, वाराणसी।
४. प्रकाशक का नाम	श्री क्षेत्रेशचन्द्र चट्टोपाध्याय
राष्ट्रियता	भारतीय
पता	वाराणसेय संस्कृत विश्वविद्यालय वाराणसी।
५. सम्पादक का नाम	श्री क्षेत्रेशचन्द्र चट्टोपाध्याय
राष्ट्रियता	भारतीय
पता	वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।
६. स्वामित्व	वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।

मैं श्री क्षेत्रेशचन्द्र चट्टोपाध्याय घोषित करता हूँ कि उपरि लिखित विज्ञप्ति मेरी जानकारी के अनुसार बिलकुल ठीक है।

श्री क्षेत्रेशचन्द्र चट्टोपाध्याय
हस्ताक्षर

CC-0. Sampurnanand University Collection. Digitized by eGangotri

सारस्वती सुषमा

वाराणसेयसंस्कृतविश्वविद्यालयपत्रिका

१. एषा देशे विदेशे च लब्धप्रसारा त्रैमासिकी संस्कृतपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं ज्येष्ठभाद्रपदमार्गशीर्षफाल्गुनपूर्णिमासु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः समालोचनाप्रवृत्तेश्चोद्बोधनं प्रोत्साहनं चास्ति।

४. अस्यां वाराणसेयसंस्कृतविश्वविद्यालयस्य विदुषां मौलिकविचारपूर्णा अनुसंधानप्रधामा निबन्धाः प्रकाश्यन्ते।

५. लेखकेन प्रकाशितस्य निबन्धस्य पञ्चविंशतिः प्रतिमुद्रणान्युपलब्धानि स्युः।

६. अस्या वार्षिकं मूल्यं सप्त रूप्यकाणि, प्रत्यङ्कं च रूप्यकद्वयं वर्तते।

७. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः "सम्पादक, सारस्वती सुषमा, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी–२" इति संकेतेन विधेयः।

———

प्रकाशक—श्री क्षेत्रेशचन्द्र चट्टोपाध्याय, संचालक—अनुसंधान संस्थान, वाराणसेय संस्कृत विश्वविद्यालय, वाराणसी।

मुद्रक—श्री बलदेवदास, संसार प्रेस, संसार लिमिटेड, वाराणसी।

CC-0. Sampurnanand University Collection. Digitized by eGangotri